Funding: Tattva Heritage Foundation Kolkata. Digitization: eGangotri.

॥ श्रीशः शरणम् ॥

मधुरवाणी

संस्कृतमासपत्रिका

प्रधान सम्पादकः
पं. गलगलीरामाचार्यः
संस्कृतसाहित्यरत्नम्

सम्पादकः
पं. वुर्लीश्रीनिवासाचार्यः
संस्कृतसाहित्यभूषणम्

सहसम्पादकः
पं. गलगली जनार्दनीनाथाचार्यः
सं. सा. सुधाकरः

नैक
राकौ
नैको

गा लो

मानितः
नारायणः" ॥

वार्षिकं मूल्यम् रूप्यकचतु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अवधानं दीयताम् वैद्यवराः

भवदर्थे मूल्येनाल्पेन सिद्धौषधविक्रीणनमस्माभिः क्रियते । भवतां समाधानमेवस्माकमिष्टम् एकवारमनुभूयतां औषधेगुणाः मूल्यपत्रं (Price list).

आयुर्वेदीय औषधि भांडार २८ शुक्रवार पुण्यपत्तनम् ।

अनुक्रमणिका

क्र.	विषयाः	लेखकाः	पृ.
१	श्री न्या. मू. लौकूर महोदयेभ्यो मधुरवाणी सत्कारः	स. संपादक.	१
२	न्या. मू. लौकूरमहोदयानां भाषणसारः	,,	२
३	संपादकालोकः	स संपादकः	३
४	संदेशद्वयसारास्वादिनी	पं. ए. व्ही. गोपालाचार्याः ॲडव्होकेट त्रिचनापल्ली	९
५	महाकविः कालिदासः	पं. क्षमाबाईराव मुंबई	१४
६	परिहासविजल्पितम्	स. संपादकः	२४
७	दोषोऽत्र नः कीदृशः	सौ. सुलोचनादेवी	२६
८	शृंगारसंगिन्यः कव्यंगनाः	रसिकः	२७
९	रायपूर सं. पा. शालामहोत्सवः	शास्त्रीगिरिजाशंकरभाई अहमदाबाद	३२
१०	देवी तिरुमलांबा	[illegible]दकः	३३

द्वादशे वर्षे अयं तृतीयोंकः । चतुर्थांकमुद्रणमारब्धम् मूल्यप्रेषणे त्वरा विधेया । तथा येभ्यो व्ही पी. द्वारा [illegible]थन प्राक्तनोंकः प्रेषितः स्यात् [illegible] त्वरया मूल्यप्रदानेन स्वीकर्तव्यः । सुभाषांकः तथा तत्पूर्वांकाश्च बहुव[illegible] त्सकाशे अस्माभिरितः प्रेषिताः अपि [illegible]नरहिताः संतः अस्म[illegible] प्रत्यागच्छन् । अतो [illegible] प्रार्थया[illegible]पां सविधे येये [illegible] [illegible]भमंतामिति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata: Digitization: eGangotri.

॥ श्रीशः शरणम् ॥

मधुरवाणी.

सुधानिष्यन्दिन्या मधुरमधुरालापकलया
खलावज्ञामूर्च्छामरमपहरन्ती सुरगिरः ।
मनोज्ञालङ्कारा रसिकजनचेतांसि सहसा
वशीकुर्वाणेयं भुवि मधुरवाणी विजयते ॥

१२ वर्षे] १८६८ शकस्य [३ सञ्चिका

न्यायमूर्ति लोकूरनारायणरावमहोदयेभ्यो मधुरवाणीसत्कारः

न्या॰ लोकूरमहाशयानां षष्ट्यब्दपूर्तिमुपलक्ष्य मधुरवाणीसंस्थया सत्कार-समारम्भः निर्वर्तितः । तत्र म. स. सं, पण्ढरीनाथाचार्यः स्वगिरा न्याय-मूर्तीनां तथा तत्पुत्रपुत्रीकलत्राणां संस्कृतभाषायां पाण्डित्यमभिमानमनुरागं च तद्गृहस्य च "भृत्याङ्गना यत्र गिरं (देवीं) गिरन्तीति लक्षणलक्ष्यत्वं, सदैवैरो प्यवातावरणस्थानामपि तेषामार्यसंस्कृतिसंस्कृतविद्यैकनिष्ठत्वं, मधुरवाणीविषये च जन्मप्रभृत्येव तेषामात्मीयभावनां सक्रियसहानुभूतिं शाश्वतनिधिसंग्रहाय तैर्विहितं विधीयमानं विधास्यमानं च अपारं साहाय्यं प्रतिपाद्य प्रशस्य च "स पिता पितरः तस्याः केवलं जन्महेतवः" इति तस्या अयं यथार्थपिता-शताधिकवर्षाणि जीवेत् जीयाच्चेत्याशास्य पुष्पहारगुच्छादीन् समर्प्य सत्कृत्य प्रचण्डकरताडिकाकडकडाटमध्ये तमुपश्लोकमायास ।

"श्रीकान्ते बहुभक्तिभाक् स्वधिषणालोकाचविस्मापितो
नेकाग्रेयसुधीश्च संस्कृतलतासेकाय बद्धादरः ।
राकोल्लासिसुधाकरामलयशा लोकोरुसम्मानितः
नैकोदारगुणान्वितो विजयतां लोकोरुनारायणः" ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'आशासे 'मधुरा वाणी' भवेत् साप्ताहिकी द्रुतम्'

न्यायमूर्तीनां भाषणसारः

"संस्कृतभाषैव सर्वभाषाणां मूलम्। सा सर्वैरपि भारतीयैरवश्यमेवाध्येया। ममतु तत्र विशेषपाण्डित्याभावेऽपि बाल्ये सम्यगेवाभ्यासो विहितः। पूर्वार्धकादम्बरी—शाकुन्तल—वेणीसंहारोत्तररामचरितादीनि तदानीं मया कण्ठस्थीकृतानि। मम तु दृढमतं यत् कण्ठस्थीकरणं विना न कस्यामपि भाषायां तत्रापि संस्कृतभाषायां व्युत्पत्तिर्नोत्पत्तुमर्हति। मुंबैनगरे भारतीभुवनविद्यार्थिभ्योपि मयैतदेवोपदिष्टमत्रत्येभ्योपि एतदेवोपदिश्यते। आंग्लशालास्विदानीमनुस्रियमाणा पद्धतिः व्युत्पत्त्यनुपयोगिनी। इदानीमेव श्री पण्ढरीनाथाचार्याणामस्खलितमप्रतिहतं च संस्कृतभाषणं श्रुतं सर्वैः। एतादृशवाक्सिद्धि-शुद्धि-वैदग्धीसंपादनाय एभिः कियन्तो वा श्लोकाः काव्यनाटकादीनि च बाल्ये कण्ठस्थीकृतानि स्युः ? । संस्कृतभाषाया वशीचिकीर्षा चेत् नैकानां हृद्यगद्यपद्यानां मुखपाठ एव आवश्यकः। संस्कृतभाषोद्धाराय पत्रिका एव जीवातवः। अत एव मम तासु बाल्यत एव गरीयानुरागः। संस्कृतचन्द्रिकासम्पादकाः कैं. अप्पाशास्त्रिणो ममात्यन्तपरिचिताः। बहुधा तेषां कार्येषु मयापि सहकारः कृतः। तैः संस्कृतभाषायां लिखितानां केषांचित् ग्रन्थानां प्रस्तावनापि मया तदादेशवशेन लिखिता। अस्तु। इदानीन्तु प्रचलन्तीष्वपि कतिपयसंस्कृतपत्रिकासु भाषासौन्दर्येण शैलीमाधुर्येण विषयवैविध्येन अर्थगाम्भीर्येण भावसारस्येन आकारसौष्ठवेन च मधुरवाणी एव उत्कृष्टतमा श्रेष्ठतमा च। जानेऽहमेषु दिवसेषु स्वतन्त्रमुद्रणालयाभावे पत्रिकाप्रचालनं कियत्कष्टसाध्यं कर्मेति। सत्यमस्मिन् विषये संपादकान्नयोपि नितान्तमभिनन्दनीयाः। अहं पुनराशासे यदियं मधुरवाणी अचिरादेव साप्ताहिकी भवेदिति। मयाऽपि यावच्छक्यम् अथवा शक्तिमतिक्रम्यापि मधुरवाणीसमुन्नत्यै साहाय्यमनुष्ठास्यते। संपादकानामपि भगीरथप्रयत्नस्य देवः यशो दद्यात्। साप्ताहिकमधुरवाणीसंदर्शनसुवर्णसन्धि च अचिरादेव नः समुपस्थापयेत् इति भगवन्तमनन्तशयनमेव प्रार्थये।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सम्पादकालोकः

अथ भूतोच्चाटने विनियोगः

भारतवर्षन्त शरीराध्तः प्रविश्य तदीयसर्वतोमुखाऽधोगति—अवनति-कारणीभूतस्य ब्रिटीशभूतस्य अचिरादेव इतो भारतवर्षादुच्चाटनं भविष्यतीति श्रुत्वा सत्यमुच्छ्वासिता आश्वस्ता आनन्दिताश्च सर्वेऽपि स्वातन्त्र्यप्रेमिणो भारतीयाः । सुविदितब्रिटीशलोककपटतन्त्रा असकृदनुभूताग्लमन्त्रिमंडलोच्चारित-मधुमधुरवाग्दानविषविषमपरिणामाः बहव एव राजकारणाधुरंधराः आंग्लानाम-चिरादेव भारतपरित्यागाविषये सन्दिहन्त्येव । परं समालोचितायां परितः परिस्थित्यां नैतदसंभावितमिति प्रतिभाति । आन्तरराष्ट्रीयपरिस्थितिरियदतिसूक्ष्मा तीक्ष्णा च वर्तते यदिदानीं न कोपि बलिष्ठो जनाङ्गः देशो वा अन्यस्य यस्य कस्यापि वा लघुनः बृहतो वा राष्ट्रस्य उपरि तत्रापि भारतसदृशस्य जनाढ्यस्य धनाढ्यस्य प्रचंडशक्तिसंपन्नस्य च राष्ट्रस्योपरि न कथंकारमपि अनियन्त्रिता-धिकारं सार्वभौमसत्तां वा प्रचालयितुं शक्नोति धृष्णोति च ।

भारतस्य आन्तरपरिस्थितिं निरीक्ष्य सत्यमेव हि भीताः सर्वेऽपि गर्वान्धशासकाः । विनापि नायकम् अन्तराऽपि च मार्गदर्शकनेतारम् १९४२ आगस्टनवमीसुमुहूर्ते कतिपयदेशप्रेमितरुणगणारब्धा क्रान्तिः इयद्भयंकरी यदा जाता, तदा जवाहीरसदृशः नेता स्वयं क्रान्तिकाहलीमाध्माय प्रत्यक्षहिंसा-मयं युद्धं प्रारभेत्, तदा कियान्वा अनर्थः समुत्पद्येत, कीदृशी वा महती विपत्तिः आंग्लजनानां संभविनी इत्येतत्कल्पनाऽपि आंग्लपार्लमेंटस्य हृदयकंप-मेवोत्पादयामास । सुभाषचन्द्रेण एकाकिनैव असहाय्येनापि परराज्ये परदेशेऽ पि गत्वा अपारं द्रव्यनिधिं संगृह्य इयान् बलवान् अजिक्यः सेनासागरः निर्मापितः । स एव सुभाषः भारतीयसेनापतिपदेऽभिषिक्तः सन्जवाहीर—बलदेवसिंहादिनां साहाय्येन भारतीयसेनानिर्माणकर्मोद्यतश्चेद् भारतवर्षः न केवलमिंग्लंडस्य परं समग्रयुरोपखंडस्य किं बहुना समग्रप्रपञ्चस्यैव अजेयराष्ट्रं भवेदिति विचार्य धूर्तशिखामणिः अॅटली-हाशयः १९४८ जूनमासि वयं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भारतं विहाय स्वदेशं गमिष्याम इति समुद्घोष्य दूरदर्शितां प्राचीकटत् । नास्त्येवान्योपायो ब्रिटीशानाम् । निस्संशयमेव ते त्यक्ष्यन्ति भारतम् । परं प्रयाणसमयेऽपि वा स्वसंरोपितजातीयद्वेषविषवृक्षो यथा दृढमूलो भवेत्, तथाविधव्यापारान् परित्यज्य जातीयसंस्थानामवास्तवमहत्त्वमप्रदाय वस्तुतो ये भारतहितचिंतका राष्ट्रीयमनोवृत्तयः गान्धीनेहरूसदृशाः प्रमुखा विद्यन्ते तेषामेव हस्तेऽधिकारं प्रदाय स्वावासं प्रतिनिवर्तन्ताम् । तेनैव हि भारतेंग्लंडयोः सौहार्दमक्षतं रक्षितं भवेत् । भारतोऽपि अमेरिकावदापन्मित्रं भवेत् । तेन च समग्रजगति एव शान्तिस्तुष्टिः पुष्टिश्च निरन्तरं निरन्तरं यं चाविष्ठेयुरित्याशास्महे ।

उपोषितगुरूजेर्हि पारणं धर्मपारणम्

भक्तप्रेसरपुण्डलीक हृदयपुण्डरीकाविकासपण्डितप्रचण्डमार्तण्डस्य खण्डपरशु-आखण्डलादिसकलसुरमण्डलाशिखण्डमण्डनायमानपदपल्लवस्य अखण्डपापषण्ढखण्डनोद्दण्डप्रचण्डपुण्डरीकस्य पण्ढरीनाथस्य भगवतः पाण्डुरङ्गस्य परमपवित्रं मन्दिरं चण्डालानां कृते मुक्तद्वारमभूदिति श्रुत्वा वज्राहत इव विद्युताडित इव मृत्युकाल्पित इव विह्वलीभवति मूर्छामृच्छतिच सर्वोऽपि सनातनलोकः । किमनेन साधितं साग्रहोपोषणेन सानेगुरूजीमहाशयेन देवमन्दिरस्य अनादिकालतः अद्ययावत् सुरक्षितदेवमन्दिरपवित्र्यभङ्गं विना ? । को वा लाभः किंवा हितं विहितं भवत्यस्पृश्यानां देवमन्दिरप्रवेशनेन । नाप्यैहिकं नापि पारमार्थिकम् । अस्पृश्यानां देवमन्दिरप्रवेशस्य श्रुतिस्मृतिषु स्पष्टमेव निषिद्धत्वात् नरकाद्यनर्थकारणत्वकथनाच्च नास्त्येव पारमार्थिक—पारलौकिकफलप्राप्तिप्रत्याशा । तथैव हि नापि कोपि च लौकिको लाभः । न तावता तेषां समाजे सदोन्नद्रमभद्रं दारिद्र्यं परिहृतं भवति, नवा अस्पृष्टसमाजे सर्वसाधारणं सर्वविषयकमज्ञानं हृतमपहृतं, नापि तज्जातिनिरूढाः व्यभिचाराद्यनाचाराः हेयसंप्रदायाः वा शुद्धीकृताः किंबहुना न तेन खलु तत्र

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

केवल प्रवेशनेन तेषां किमपि कीदृग्विधमपि किंचिदपि हितं साधितं भवति। प्रत्युत नरकाद्यनर्थसाधनेन अज्ञसमाजस्य उपरि महानेव अपकार एव कृतः।

यदि गुरूजीमहाशयस्य मनसि सत्यमेव हरिजनानां विषयेऽकम्पा अनुकम्पा स्यात्, सत्यमेव हि तत्समाजोद्दिधीर्षा चेत् मन्दिरप्रवेशाग्रहः व्यर्थ एव। ब्राह्मणादिनां साक्षान्मूर्तिदर्शनेन यादृशं फलं पुण्यं वा भवेत् ततोऽशंतोऽप्यन्यूनमेव पुण्यं चण्डालादीनां केवलशिखरदर्शनेनैव सुलभमिति साधीयानेव भगवत्प्रसादसंपादनमार्गः साधुसंप्रदर्शितः श्रुतिस्मृतिषु। यदि च तेषां सामाजिकलौकिकोन्नतिसिषाधयिषा तर्हि मुम्बयीअहम्मदाबादप्रभृतिपट्टणस्थलक्षाधीशकोटीश्वराऽब्जाधीशानां गृहदेहलीपुरस्तादुपविश्य एवं द्रव्यसंग्रहार्थमुपोषणा विधीयेत तेन अपारा अपरिमिता च संपत् संपादिता भवेत्। तया च श्रिया तेषां हीनजातीयानां सामाजिकार्थिकशैक्षणिकशारीरिकमानसिकादयः सर्वविधा अपि सुधारणाप्रगत्युन्नतयः संसाधिताः भवेयुः। तदेतत्सर्वमप्यपहाय किमेतदकाण्डताण्डवमारब्धं गुरूजीमहाशयेन? को वाऽनेन लाभः स्वस्यवापरेषां वा अन्त्यजानां वा? सानेमहाशयः यद्यतामेतादृशीं वा उपोषणां भगवन्तं पाडुरङ्गमुद्दिश्य तत्प्रीत्यर्थं तत्प्रसादसंपादनार्थं वाऽकारिष्यत् तदा लोष्ठाधिष्ठितपद्मपेलवपदः विठ्ठल एव साक्षात्कृतोऽभविष्यत्। अभीप्सितं वरं फलं चाप्यदास्यत्, प्रसन्नः पांडुरङ्गः चण्डालानपि उदधरिष्यत्, तेषां समेषामेव भारतीयानां विपत्परंपराम अपाहरिष्यत्।

"इदमत्राकूतम्"

परन्तु कुत्र वर्तते गुरूजीमहाशयस्य पाण्डुरङ्गविषये तथाविधा भक्तिः विश्वासो वा। तदीयोऽयमाग्रहोपि न खलु विठ्ठलविषयकात्युत्कटश्रद्धाभक्तिनिबन्धनः। किं तस्य नास्तिकशिखामणेः स्पृष्टेनास्पृष्टेन वा विठ्ठलेन?। यदि अस्पृष्टानां मन्दिरप्रवेशनमेवोद्दिष्टमिष्टं चेत् तस्य उपोषणानटनपटोः कपटगुरोः, तर्हि तच्च अचिरादेव भविष्यत्येव मुम्बयीसर्वकारांगीकारिष्यमाणमन्दिरप्रवेशविधिनैव। तथाविधमाश्वासनमपि दत्तमासीत् खेरप्रभृतिमन्त्रिमण्डलैः। महात्मा गान्धीमहाशयोपि असकृन्नैकतन्त्रीः संप्रेष्य न्यरौत्सीत् अदसीयमवसरो-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पक्रान्तमन्यायोपोद्बणम्। एवं सर्वेष्वपि राजकीयनेतृषु निरुन्धानेष्वपि, अधिकारवर्गेषु 'द्वित्रिमासेभ्योऽर्वागेव हरिजनान् निश्शङ्कं विठ्ठलमन्दिरे प्रवेशयिष्यामः' इति सप्रतिज्ञं सोरस्स्पर्शं समाश्वासयत्स्वपि अत्याग्रहाद् अनवसरे अद्यैव देवमन्दिरं कलुषीकरोमीति, किमर्थोयं दुरभिनिवेशः ? आम् ज्ञातम् !

" किं किं न कारयति नीचयशोदुराशा "

कीर्तिकामना हि चेतयति मानवान् पशुवच्चेष्टितुम् । गुरूजीमहाशयोप्येवं व्यचिन्तयत् "सर्वकारीयदेवमन्दिरप्रवेशविधिनैव यदि विठ्ठलमन्दिरान्तरन्त्यजाः प्रविशेयुः तदा का नाम स्वस्य कीर्तिः ? का वा प्रतिष्ठा ? अतः अयमेव सुवर्णसन्धिः ह्रसिमानं क्रशिमानं चोपगच्छन्त्या अस्मत्कीर्तेः पुनरभ्युत्थानाय प्रसाराय च । इदानीं च हरिजनोद्धारककांग्रेसमन्त्रिमण्डलस्यैव अधिकारारूढत्वात् कीदृग्विधायामपि मया हठचेष्टायां प्रारब्धायामपि सा यशस्वीभवत्येव । अयमेक एवाऽनन्योपायः समाजसत्तावादिनां प्रतिष्ठारक्षणायेति "

" श्रिताःस्मः चन्दनभ्रान्त्या विषवृक्षं भयंकरम् "

यथार्थश्चाभूत्तदीयस्तर्कः । प्रारब्धे—तूपोद्बणे श्रीमावळणकरप्रभृतयः प्रमुखा आगत्य दीनदुर्बलान् वेतनाविनाशभीरून् अर्चकान् भीषयित्वा पूजकमण्डलीसंमतिं समपादयन् । गुरूजेश्च पारणं विजयोत्साहेन निर्वृत्तमभूत् । परं तेनैव पारणेन साकं सनातनधर्मस्यापि मारणं देवमन्दिरपावित्र्यापहारणं च समभूत् । श्रीखेरमाळवणकरप्रभृतिभिः गुरूजीप्राणरक्षणैकदक्षै र्न लक्षितः भरतखण्डे सहस्राधिकवर्षेभ्यः निरूढस्य धर्मस्य प्राण एव अनेन अपहृतो भवतीति । यस्य खलु परमपवित्रतमस्य कोट्यधिकभारतीयभक्तिश्रद्धाद्येकाधिष्ठानस्य पावित्र्यं धर्मध्वंसैकोद्देशैः मूर्तिभञ्जनैकप्रधानध्येयैर्यवनैरपि सप्तशताधिकत्रर्षपर्यन्तेपि स्वकीयशासने नैव विनाशितं तथा परदेशीयैः परजातीयैः परधर्मीयैस्सर्वथा परकीयैरप्यांग्लै र्न विध्वस्तं प्रत्युत अक्षतमेव सुरक्षितं तदेव विठ्ठलमन्दिरपावित्र्यमस्मदीयैरेव अद्य ह्य एव अधिकारारूढैः कांग्रेसनेतृभिः समूलनाशं विनाश्यते इति हन्त सन्तप्तमेव प्रक्षुब्धमेव च भवति चित्तम् । तदेतदुदन्तं श्रुत्वा यस्य कस्यापि धर्मप्रणयिनः "स्वराज्यं प्राप्तम्, इतो नास्त्येव नः काचिदनुपपत्तिः" इति दृढं भावयतः भारतीयस्य वदनान्नि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्सरेदेवावशतया "श्रिताः स्मः चन्दनभ्रान्त्या विषवृक्षं भयंकरम्" इति वचनम् ।

"वचस्यन्यन्मनस्यन्यत् कर्मण्यन्यत्"

सर्वेऽपि कांग्रेसनेतारः घण्टाघोषमावेदयन्ति यद "न वयं कस्याप्युपरि बलात्कारं विधास्यामः, जनमनोविरुद्धान् न कीदृग्विधानपि व्यापारानानुष्ठास्यामः । अयं हि जनतासर्वकारः । जनाभिप्रायस्यैवात्र प्राधान्यं नत्वधिकारिणाम् इति" । परंतु गुरूजीप्राण—प्रतिष्ठाधनुचिन्तनव्यग्रेण मुम्बैसर्वकारेण किं विचारितः जनाभिप्रायः ? । पंढरीनाथो हि समग्र एव भारतखण्डे अनन्यभक्त्या कुलदेव इति कोट्यधिकजनैस्समुपास्यते । प्रत्याषढकार्तिकं लक्षाधिकाः सन्तः भक्ताश्च अहमहमिकया आयान्ति सन्तुष्यन्ति च देवसन्दर्शनेन । एकस्य गुरूजेः मनःप्रीणनकृते इयतां बहूनां विट्ठभक्तानां हृदयविदारणं किं जनतासर्वकारस्य कर्तव्यं ? सत्यमेव हि अनेन खल्वधर्मव्यतिकरेण हृदये दिग्धशरैरिवाहता धर्मवर्माणः । जनाभिप्रायावगमनाय प्रथमतो यज्जयकरनियोजनं कृतमासीत् तां प्रजाराज्यपद्धतिं परित्यज्य कोयं हिटलरीयमार्गः कुतोऽ वा नुसृतः गुरूजीमहाशयेन ? । येनकेन प्रकारेण प्रसिद्धपुरुषो भवेत्" इति प्रसिद्धिप्रत्याशयां अनवसरतांण्डवमुपक्रममाणायगुरूजीमहाशयाय कुतो वा सहकारःप्रदत्तः जनसामान्यसंमत्यसंमती अविचार्यैव कांग्रेसनेतृभिः? । कुतो वा जनमतगणनारीतिः सर्वत्रापि समनुसृता परित्यक्ता ? । निश्चितमेवासीत् यत् मन्दिरे चण्डालप्रवेशविषये गणिते च जनमते प्रवेशविरोधकानामेव संख्याप्राबल्यं भवतीति । अत एव प्रजासत्ताकशासनप्रणालीं समुल्लंघ्य 'आपकी मर्जी' अस्मदिच्छापद्धतिरेवानुसृता प्रच्छन्नसर्वाधिकारिभिः देशीयप्रमुखैः । एतेन एतत्सजातीयैरेव अन्याग्यैरन्याग्यैर्जघन्यैर्धर्ममर्मारुन्तदैर्दुष्कर्मभिरुद्वेजिता वंहीयांसः भारतीयाः उद्गिरन्ति "वरमाग्लेयराज्यं हि धर्मघातिस्वराज्यतः" ।

किमत्र प्रतिविधेयम्

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।उत्पथप्रतिपन्नस्य कार्यं भवति शासनम्" इति वचनमनुसृत्य कांग्रेसस्य पृष्ठबलावलिप्तस्य ब्रह्मबन्धोः नहिंनहि चण्डालबन्धोः सानेगुरोरेष दुराग्रहः यथा फलेग्रहि नैस्यात् तथा विधेयम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नाद्यापि व्यतीतः खलु कालः । नाद्यापि विठ्ठलमन्दिरे प्रविष्टा अन्त्यजाः केवलमिदानीं अर्चकमण्डल्यां बहुमतेन हरिजनानामपि कृते द्वारमपावरणीयमिति निर्णयः स्वीकृतः । स्वीकुर्वन्तु नाम स्ववृत्तिलोपभीरवः अर्चकाः यादृशं तादृशमपि निर्णयम् । नासौ विठ्ठलः अर्चकाधिकारकः अर्चकानामेव देवः परंतु सर्वेषामपि देवः । अतोत्र शान्तरीत्या अहिंसात्मकसत्याग्रह एव सनातनधर्मानुयायिभिः प्रारंभणीयः । सर्वैरपि पीठाधिपतिभिः सर्वैः स्वस्वशिष्याः समाज्ञापनीयाः प्रचोदनीयाः सत्याग्रहार्थे । श्रीराजेश्वरशास्त्रि देवनायकाचार्यशंकराचार्यैरपि प्रयत्यापि वैफल्यमधिगम्य पंढरपूरतः प्रतिनिवृत्तमिति संश्रुणुमः । परं कुतो वैतादृशमौदास्यं नैराश्यं चावलम्बनीयं धार्मिकैः । वर्णाश्रमस्वराज्यसंघ इदानीं अग्रेसरत्वमंगीकृत्य प्रचण्डमान्दोलनमुद्भावयतु । सुदैवात् इदानीं देवनायकाचार्यसदृशः अध्यक्षः लब्धो वर्तते यदीदानीमपि एतादृश्यामप्यत्यन्तसङ्कटमयपरिस्थित्यां वर्णाश्रमस्वराज्यसङ्घः निष्क्रिय एवातिष्ठेत् यदि सर्वेऽपि पीठाधिपतयः यतयश्च तूष्णीमेवासीरन् तान् दूरादवतं तांश्च नमस्कुर्मः ।

अस्माकं भारते धार्मिकशक्तिः प्रचण्डा वर्तते । कुम्भमेलादिधार्मिकसमारम्भेषु यावन्तो जना संमिलन्ति तावन्तः न राष्ट्रीयमहासभाधिवेशनप्रसङ्गेऽपि । साक्षात् पण्ढरपुरेऽपि प्रतिवर्षं द्वित्रिवारं द्वित्रिलक्षसंख्याया संमिलन्प्रचण्डजनस्तोमः द्योतयति भारतीयजनसामान्यहृदयप्रसुप्तधर्मभावनानां प्रखरतां देवभक्तेर्जागरूकतां च । परंतु योजकस्तत्रदुर्लभः । अत एवेयमनवस्था । अतोऽत्र सर्वेऽपि सर्वमतीया अपि जगद्गुरवः मिलित्वा सर्वे अपि धार्मिकसंस्था एकीभूय सर्वेऽपि च पण्डितप्रकाण्डा शास्त्रिणो भट्टा आचार्याश्च संभूय सकलधर्माभिमानिजनतां संघटयित्वा धर्मजागृतिमुत्पाद्य अहिंसात्मकशान्तिप्रधानं धर्मयुद्धनारभेयुः तदाऽचिरादेव नः धर्मस्वातन्त्र्यं लभ्येत् अस्माकं धर्मः देवाः देवमन्दिराणि श्रुतिस्मृतयः संस्कृतविद्या आर्यसंस्कृतिश्च अक्षता रक्षिताश्च भवेयुः । नो चेत् सर्वनाशः एव । अतो इदानीमपि आलस्यमौदास्यं नैराश्यं पारस्परिकद्वेषासूयादिकं च परित्यज्य चक्षुर्षा उन्मील्य सर्वेऽपि सनातनधर्मानुयायिनः 'उत्तिष्ठत जाग्रत' । 'साहसे श्रीः प्रतिवसति' 'तस्माद्युध्यस्व भारत' ! म. स सं. पण्ढरीनाथाचार्यः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सन्देशद्वयसारास्वादिनी

ले.—पं. ए. व्ही. गोपालाचार्यः
सं. सा. परिषदध्यक्षः ॲडव्होकेट त्रिचनापल्ली

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासिताऽऽलिंगितानाम्
अंगग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥

'स कामी' इति सन्देशारंभे एव निर्दिष्टोऽयं यक्षः काममयः । 'नीता रात्रिः क्षणमिव मया सार्धमिच्छारतैर्या' इति कृत्स्नापि रात्रिरविच्छिन्नं मिथुनभोगैरेवानीयतेति वक्ष्यति । न रमणस्य क्षणमात्रविरमणमपि क्षपायाम् । क्षणदा उत्सवदा । व्यवायस्य भूयः श्रान्तिप्रदत्वं प्रसिद्धम् । रतिव्यापारे सर्वेषामंगानां वैयग्र्यं पटुना चापेक्ष्येयाताम् । प्रथमसुरते एवांगग्लानौ सञ्जातायां कथं सुरतभोगाऽविच्छेदसम्भवः इति शंका जायेत । सा निवर्त्यतेऽत्र सुरतजनिताऽङ्गग्लानेः सद्योऽपनोदकसामग्र्याः संपत्तेस्तत्क्षण एव पुनः सुरतोद्योगदक्षतानिर्वर्तनस्य वर्णनेन । यत्र—यस्यां इति पुनः पुनः पठनेन स्वनगर्यां मलकायां भूयसीमभिमतिं द्योतयति । तत्रत्यानां यूनां संयोगश्रमस्यानायासेन शमनोपायमतिरमणीयमावेदयति इति पूर्णसरस्वत्यवतारिका । प्रियतमभुजोच्छ्वासितालिंगितानां । प्रियतमाः—कान्ताः, स्त्रीणां प्राणाः उच्छ्वसितम् प्रेमरसभरितस्तन्निरन्तरसंश्लेषः प्रियतमः । आलिंगितेषु कान्तभुजानां प्रियतमत्वम् । आलिंगितानां प्रियतमत्वम् । भोगकाले तत्तन्मिथुनीभावव्यापारस्य प्रियतमत्वमिति तत्रतत्र प्रियतमत्वबुद्धिस्तदा तदा भवति, "इदं निरतिशयसुखं इदं निरतिशयसुखं इति कान्तभुजाभ्यां निर्दयं निबिडालिंगनैः श्वसनस्यैव क्लिष्ट-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्लिष्टतापादनेऽपि, अंगानां ग्लानिकरत्वेऽपि तदालिंगितानां प्रियतमत्वमनुभूयते। ईदृशश्रमदायिपरिरंभणानामुच्छ्वसितवत्प्रियतमत्वं स्त्रीणाम्। 'प्रियतमे'ति, तदंगसंगस्यअमृतायमानत्वेन सुदृढमप्यालिंगनं किसलयमृदुलाभिरपि सह्यते इति द्योत्यते। मुजेति—प्रियतमानां दयया मृदूपक्रमऽपि, तद्भुजानां प्रियागात्रस्पर्शसुखग्रहग्रस्ततया तदंगं प्रविविक्षतामिव, अभेदमभिलषतामिव निर्भरपरिरंभणारंभः सूच्यते" इति पूर्णसरस्वती। "आलिंगितायां पुनरायतायामाशास्महे विग्रहयोरभेद' मिति खल्वालिंगनरसमज्जनम्। द्वैतं विस्मृत्य, अद्वैते मज्जनम्। 'अविभागेन दृष्टत्वा' दिति मुक्तजीव—ब्रह्मैकीभावसंश्लेषरसानुभवप्रदर्शनं रसानन्दमयब्रह्मनिष्ठस्य बादरायणस्य। यथा प्रियतमया भार्यया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरं, तथा प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्च न वेद नान्तरं इत्यौपनिषदं रसमयं प्रदर्शनमत्र भाव्यम्। 'अशिथिलपरिरंभव्यापृतैकैकदोष्णोरविदितगतयामा रात्रिरेव व्यरंसीत्' इति भवभूतिश्लोको भाव्यः। 'अंगग्लानिं सुरतजनितां'। आलिंगितानां दैर्घ्यं दृढत्वञ्च दीर्घश्वासं निरुच्छ्वासत्वञ्चापादयतः। "श्रियो ज्वालालीलाः विषयजरसाः प्रान्तविरसाः विपद्गेहं देहं महदपि धनं भूरि निधनं" इति प्रबोधचन्द्रोदयश्लोकरीत्या क्षणमात्रं वस्तुविचारकरणं कामिभिर्बहुमतानां एतेषां नाममात्ररसत्वं, वस्तुतो विरसतमत्वं खेदमयत्वं च प्रकाशयितुमलमिति महाकविरत्र निपुणमुपदिशति 'सुरतजनितामंगग्लानि मिति। कान्तयो रतोत्सववर्णनमध्य एव कान्तासंमितयोपादिशति कविर्विरागस्यैव वस्तुतः स्थायिरतिप्रदत्वमिति। अयस्तु परिशिष्यते शमितचित्तखेदो रसः' इति सङ्कल्पसूर्योदयम्। 'ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते। आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥" इति भगवद्गानं स्मार्यते। अस्य सुरतमिति नाम। किमत्र शोभनं, किं वात्र रतम् सर्वांगीणपरिखेदनिष्पादकस्यास्य सुरतसंज्ञा मिथ्यैकान्ता, विपरीता। "चिररतिपरिखेदप्राप्तनिद्रासुखाना" मिति माघः। यावती रतिस्तावान् ततो ज्यायांश्च परिखेदः। रतिविहारकालेऽपि भृशं दुःखसंमिश्रत्वमेव। भोगस्य आलिंगितं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उच्छ्वासितजनकम् । "उत्तुंगपीवरकुचद्वयपीडितांगमालिंगितः पुलकितेन भुजेन रत्या" । इति प्रबोधचन्द्रोदये आलिंगनरूपसंमर्दनस्य पीडनमिति व्यवहारः । आलिंगनस्य पीडनरूपतत्त्वं प्रकाशयति संस्कृतगाथैव । ग्लानिशब्देन अंगानां कुसुमसुकुमारत्वं, किसलयमार्दवं व्यज्यते । 'तन्तुजालावलम्बाः चन्द्रकांताः' । खट्वावितानादधो लम्बन्ते सूत्रजालग्रथिता गुलिकाकाराः चन्द्रकान्तशकलाः मालारूपेण । अल्पाल्पाः रतिजलकणाः कणशः कणशः अवयवेषु पतित्वा शैत्योपचारेण श्रमम्रपनीय पुनरत्युद्योगाय नवीकुर्वन्ति । रतिश्रांत कामिजनाः शीतजलकणलिंपनेन श्रमं निःशेषं व्यालुम्पन्ति, अपसारयन्ति । 'त्वत्संरोधापगमविशदैः ।' मेघासंरूद्धाः चन्द्रकिरणाः चन्द्रकान्तगुलिकासु प्रसृत्य-जलकणान् स्रावयन्ति । 'जललवस्यन्दिनः सूक्ष्मसूक्ष्मजलबिन्दुप्रस्राविणः । जलस्य लवशः स्यन्दिनः । 'स्फुटजल' । स्फुटत्वं गात्रचर्मणः । स्पार्शने-न्द्रियस्य शैत्योपलब्ध्या जलकणस्य स्फुटत्वम् सर्वांगीणोऽयं सूक्ष्मशिशिरजल-कणप्रस्रवणोपचारः । जलकणानामतिसूक्ष्मत्वात् न गात्रस्य क्लेदनं । न भवति निशीथे रात्रिमध्ये । 'अर्धरात्रं निशीथौ द्वौ' इत्यमरः । "अर्धरात्रः, निशीथः इति द्वे रात्रिमध्यसमयस्य इत्यमरसुधा । एतेन प्रथमसुरतस्य यामावधिकत्वं व्यज्यते । याममात्रं सहेथाः" इति त्रिंशत्तमश्लोके वक्ष्यति । चन्द्रः, चन्द्र-कान्ताः, शीतोऽर्धरात्रसमयः इत्येते सर्वेऽपि अनयोः कान्तयोर्मिथुनभोगरसेषु साचिव्यं कुर्वन्ति ।

मेघकाव्यगांधारसालोडनचर्वणादिभिः सहृदयविद्वांसः कविना सह रात्रिं नयन्ति । प्रजागरेण निशीथे गात्रेषु ग्लानितन्द्रादिकं जायेत । तदानीं काव्यगाथान्तस्थाः सहृदयहृदयात्यन्ताह्लादजनकाः व्यंग्यरसाः हृदि स्फुरन्तः सर्वांगीणं पुलकादिकं जनयित्वा, रसिकमतीः वाङ्मनसागोचरमानन्दसीमानं प्रापयन्ति । तेन च प्रजागरादिनिर्वृत्ता शरीरग्लानिस्सद्यो निवर्तते । पुनरपि काव्यगाथारसचर्चायामुद्युक्ता भवन्ति । "त्वत्संरोधापगमविशदैश्चन्द्रपादैः" मेघकाव्यस्य तव गुणानां संरोधने, अपह्नवे मिथ्यादोषाविष्करणे च येऽ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सूयालवः उद्युक्ता अभवन् तेषामपगमेन, विशदाः—एकान्तेन सौहार्दभरिताः रसचर्वणदक्षाः दयालवः मनीषिणः साहित्यकलाचार्याः जगदाल्हादकाचार्यपादाः चन्द्रपादा इति व्यवहर्तुं योग्याः। 'चदि आल्हादने। 'यथा प्रल्हादनाच्चन्द्रः'। आनन्दवर्धनाचार्यसदृक्षाश्चन्द्रपादाः। 'ल्हादैकमयी कवेर्भारती।' अभ्य असूयुदृर्द्धदापादितदोषान्धकारनिरासकाः। 'तन्तुजालावलम्बाः'। रसनाख्याः तन्तवः। काव्यरसैः रसिकविदुषां रसनाडीतन्तवो विद्या भूत्वा आनन्दानुभवरसं प्रस्नुवते। स्फुटजलवस्यन्दिनः'। अन्तर्गतत्वात् यदस्फुटमिवाभूत् तस्य रसिकविद्वदालोडनेन स्फुटीभवने आनन्दातिशयो जायते सर्वेषां हृदि। तेन च कविः सहृदयसुमनसश्चानन्दिता निवृत्तमात्रश्रमा भवन्ति। स्त्रीणां, काव्यगाथानां, कविबुद्धेश्च। प्रियतमाः—रसिकाः काव्यगाथाः प्रेम्णा स्वबुद्धया गाढमालिंगन्ति। अनेन च कविः, काव्यं च उच्छ्वसिति। 'अन्तश्शर्म यदश्नुते सहृदयः सा जीवनाडी कवेः' इत्यभियुक्तोक्तिर्भाव्या। विभाति लावण्यमिवांगनासु इत्यंगनालावण्यदृष्टान्त उपादीयते। व्यंग्यार्थस्य हृदयहारितया स्फुटं प्रतीयमानत्वे। अथ च रामायणमहाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाशते इति ध्वन्यालोकसूक्तिव्याख्याने, 'आनन्द इति च ग्रंथकृतो नाम। तेन स हैवानन्दवर्धनाचार्य एतच्छास्त्रद्वारेण सहृदहृदयेषु प्रतिष्ठां देवतायतनादिवदनश्वरीं स्थितिं लभतां, सिद्धिं गच्छतु इति भावः। यथोक्तं 'उपेयुषामपि दिवं सन्निबन्धविधायिनां। आस्त एव निरातंकं कान्तं काव्यमयं वपुः'। इति तथा मनसि प्रतिष्ठां इति एवं विधस्य मनसः सहृदयहृदयचक्रवर्ती खल्वयं ग्रन्थकृदिति भावः' इत्यभिनवगुप्तपादगदितमिह भाव्यम्। माघे मेघे गतं वयः। मेघ इति काव्यनाम। कवेः कमनीयं यशःशरीरं मेघकाव्यसरस्वतां। वनिता इव महाकविवाचः। चन्द्राः विशुद्धा निरसूयवो रसास्वादिनः रसास्वादयितारः साहित्यनिष्णाताः चंद्र इव विशुद्धधवलं ज्ञानरसादि ज्योत्स्नावत् रसघनं ध्वनिमयं काव्यम्। चन्द्रकान्ताः— रसिकमतयः। 'काव्ये रसचर्वणा तावज्जीवितभूतां'

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

इति लोचनम्। ल्हादैकमयभारतीयचन्द्रिकास्पर्शे चन्द्रकांताः रसिकविद्वन्मतयो द्रवन्ति। तद्धृदयरसनाडीतन्तुजालेभ्यो रसश्चोतति 'येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते हृदयसंवादभाजः सहृदयाः" इति लोचनम्। "कवेः श्रोतुः समानोऽनुभवः" इति स्वोपाध्यायभट्टतौतवचनं प्रमाणीकृतं लोचनकृता। 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्'। रसिकजनैस्सह रसचर्यायाः आनन्दभूया रसिकविद्वल्लोकप्रसिद्धा। हास्तिनपुरं सन्ध्यर्थं गतो भगवान् विदुरस्यातिथ्यं वरीत्वा तत्र 'शुचि सुप्रयतो भूत्वा विदुरोऽन्नमुपाहरत्" इति परमया भक्त्योपहृतमन्नं निरतिशयप्रीत्या बुभुजे। 'विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च" इति व्यासानुभवः। "अण्वप्युपहृतं भक्त्या प्रेम्णा भूर्येव मे भवेत्" इति कुचेलं प्रति भगद्वचनम्। "विदुरान्नानि" इति बहुवचनेन कृष्णबुद्ध्या विदुरोपाहृतान्नस्य भूयाननुभवो व्यज्यते। भोजनानन्तरं रात्रिः कृत्स्ना मधुरमधुरसंभाषणैर्नीता। "तथा कथयतोरेव तयोर्बुद्धिमतोस्तदा। शिवा नक्षत्रसंपन्ना सा व्यतीयाय शर्वरी। धर्मार्थकामयुक्ताश्च विचित्रार्थपदाक्षराः। शृण्वतो विविधा वाचो विदुरस्य महात्मनः। कथाभिरनुरूपाभीरक्तस्यामिततेजसः। अ ामस्यैव कृष्णस्य सा व्यतीयाय शर्वरी" इति मधुरवाङ्मिथुनमिश्रणैरेव व्युष्टा रजनी, रात्रिरेव व्यरंसीदिति महर्षिवर्णनमिह भाव्यम्। "तथा कथयतोरेव" इति तन्मधुरवचनानां स्ववर्णनातीतत्वं व्यञ्जितम्। रसिकजनरसचर्चया सुखेन शर्वरीं कृत्स्नाप्यतिवाहयेत॥

CC-0.'Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

महाकविः श्रीकालिदासः

ले.—पं. क्षमादेवी राव मरीनलैन ३७ मुंबई.

विदुषां कीर्तिशेषाणां प्रकीर्णं वचनामृतम् ।
संगृह्योपहरिष्यामि रसिकानां मुदेधुना ॥

विदितमेवेदं भवतां यदाधुनिकैरुपदिश्यन्ते बहुविधाः पन्थानो विद्याध्यापनविषये । अवश्यपठितव्यविद्यानिर्माणे च महान् खलु विवादः । श्रेष्ठानां पुरातनीनां भाषाणामवश्यपठितव्यतां प्रति सुमहत्तरः खलु विवादः समुपलभ्यते लोके । केचित्तु हूणविद्वांसः प्रकृतानुपयुक्तपुरातनभाषाध्ययनमवश्यं पश्यन्ति । भारतीयानां तु संस्कृतं ह्यादिभवा भाषा । यदियं साधारणेष्वालापेषु हिन्दुजनैर्नोपयुज्यते तदेनामलौकिकीं व्याहरन्ति । मन्दादरः खलु भवति संस्कृतभाषायामद्य हिन्दुजनः । अभिनवागतवधूविलोभितमनाः प्राकृतजन इव जननीं हिन्दुजनोऽपि हूणभाषाध्ययनलोलुपः सम्प्रति न गणयति संस्कृतभाषाम् । पुरा खलु भूसुराः सर्वे अपि वृद्धपरम्परया निखिलशास्त्राण्युपलभ्य बहुश्रुता । परिचयमत्र बहुशो विदधिरे । यतः संस्कृतभाषाज्ञानमेव जीवनोपायस्तेषां समजायत । किन्त्वद्य वृत्तयो बहुधा प्रवृत्ता येन विरलमजनि स्वभाषाध्ययनम् कदाचित्कानि खलु संस्कृतभाषाप्रशंसनानि कस्यचिदपि साधोर्मुखाच्छ्रूयन्ते तानि खल्वरण्यरुदितानि भवन्ति ।

विविधाः खलु शैशवादारभ्य कृताः संस्काराः संस्कृतभाषयैव विहिताः । एतेऽपि यदि न परित्याज्याः सम्यगर्थावगमनेन कर्तव्याः । अस्माकं मुख्यतमं विवाहादिकं कर्म तद्भाषयैव विधीयते । सर्वमपि संस्कृतभाषया कुर्मस्तदर्थमज्ञात्वा मूक इव जनो न याति परिहास्यतामित्याश्चर्यम् ।

एवमादिभिः कारणैः संस्कृतज्ञानग्रंथावश्यकमतस्तल्लाभाय बहवः पठितव्याः । तत्र कालिदासकृतय एव श्लाघ्यतमाः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अतःपरं कोयं कालिदासः कविः काश्च कृतयस्तस्य इति विचारयामः ।

अवस्थितिकालः । अस्य कवेश्चस्थिति कालमधिकृत्य महती विप्रतिपत्तिर्वर्तते । सा च निम्नलिखितं पद्यवलंब्य प्रसरति ।

" धन्वन्तरि क्षपणकामरसिंहशंकु वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥"

अत्र विक्रमभूपतिं षष्ठशतकोद्भूतं मन्वानाः केचिद्वराहमिहिरस्य च बृहत्संहितप्रणेतारं कलयन्तः कालिदासस्य तस्य समानिककालिकत्वादयं महाकविः षष्ठशतकोद्भूत इति वदन्ति । न चायं नियमो यदेकेनैव वराहेण भवितव्यमिति । प्रमाणानुगतत्वाच्च वराहमिहिरद्वयकल्पनं न विरुद्धम् । एवं ज्योतिर्वित्त्वमप्यस्य न निर्मूलम् । बृहत्संहिताया एतत्प्रणीतत्वकल्पनेऽपि दोषाभावात् । अकल्पनेऽपि प्रामाणिकवचनबलात्तत्प्रणीतप्रबन्धानुपालम्भेऽपि ज्योतिर्वित्त्वस्य दुर्वारत्वात् । अनुपलब्धस्यापि प्रबन्धस्यासत्वकल्पनस्याप्यन्यायत्वाच्चेति । न ह्ययं नियमो यत्तत्तच्छास्त्रविद्भिरतत्र तत्र प्रबन्धाः प्रणीयन्त एवैति । दृश्यन्ते हि भूयांसः पण्डितप्रवराः ये किल प्रबन्धप्रणेतृत्वाभावेऽपि पण्डितप्रवरा इत्येवाख्यायन्ते । ततश्च दुर्निवारं ज्योतिर्वित्त्वं वराहमिहिरस्येति षष्ठशतकोद्भूतादवराहमिहिरादुपरि निर्दिष्टपद्यप्रतिपाद्यस्य वराहमिहिरस्य विभिन्नत्वकल्पनेपि दोषाभावः सुस्पष्टः । वररुचिश्चात्र निर्दिष्टः प्राकृतमञ्जर्याः प्रणेतैव स्यादिति प्रतिभाति । शंकुस्तु श्रीकालदासस्य प्रसिद्धतम एव । एवं धन्वन्तरिक्षपणकवर्जं सर्वेषामपि नवरत्नान्तर्गतपण्डितानां सङ्गतिः सम्पन्ना । एतेषां समानकालिकत्वं तु परस्तात्प्रतिपादयिष्यामः । बलवत्तरप्रमाणाभावाच्च तयोरस्तित्वार्थो न शक्यः सम्भावयितुम् ।

अपरे त्वाहुः सुप्रसिद्धतमः श्रीमान्मातृगुप्ताचार्य एव कालिदासापराभिख्यः । मात्रा श्रीकाल्या गुप्तो रक्षितो दासत्वम् पालितो मातृगुप्तकालिदास इत्यर्थः । मातृगुप्ताचार्यश्च श्रीमता प्रवरसेनाख्येन कश्मीराधिपतिनाऽऽत्मनो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

राज्यपदे प्रतिष्ठापितः । प्रवरसेनश्च खिस्तीयषष्ठशताब्द्यामासीदिति पुरावृत्त-प्रबन्धेभ्यो विज्ञातम् । अत एव तस्मिन्नवसरे श्रीमातृगुप्ताचार्यस्यांप्यवस्थानं सुस्पष्टम् । मातृगुप्ताचार्य एव च कालिदास इति खिस्तीयषष्ठशताब्द्यामेव-स्थितिसमयः कालिदासस्येति । तदेतन्नांशतोऽपि युक्ततामावहति । नहि मातृगुप्तकालिदासपदयोः समानार्थकत्वे किंचित्प्रमाणं पश्यामः । नापि मातृ-शब्दस्य कालीपर्यायत्वं दृष्टम् । ब्राह्मी माहेश्वरी चण्डी वाराही वैष्णवी तथा । कौमारी चैव चामुण्डा चर्चिकेत्यष्ट मातरः । इत्यादिवचनेषु च काल्या अविद्यमानत्वान्नहि मातृपदेन काल्या ग्रहणं सम्भवति । नापि कोशादौ गुप्तशब्दो दासपर्यायो दृष्टः । तेनापि लक्षणया गुप्तशब्दस्य तथाविधत्वं स्वीकर्तुं न शक्यम् । यत्रापि कोशादौ श्रीकालिदासनामानि दृश्यन्ते न किल तत्र मातृगुप्तपदम् । रघुकारः कालिदासो मेधारुद्रश्च कोटिचित् । इत्यभि-धानात् । यदि तु मातृगुप्तपदस्य कालिदासवाचकत्वमभविष्यत्तदा कोशादा-वपि तन्निरदेक्ष्यत । नैव तु निर्दिष्टम् । अभ्युपेतव्यमतो न कालिदसवचनो मातृगुप्तशब्द इति । अभिज्ञानशाकुन्तलादिव्याख्यासु च श्रीमद्राघवभट्टादयो मातृगुप्ताचार्यनाम्नैव व्यपदिशन्ति न तु कालिदासनाम्ना । यथा किं च मातृगुप्ताचार्यः स्वप्रणीतेष्वभिनवभारतादिषु प्रबन्धेषु मातृगुप्तनाम्नैवात्मानं निर्दिशति । औचित्यविचारचर्चायां श्रीक्षेमेन्द्रोऽपि मातृगुप्तकालिदासौ पार्थ-क्येनैव निर्दिशति ।

एवं च मातृगुप्तकालिदासयोः पर्यायत्वाभावान्मातृगुप्तस्य षष्ठशताब्दी-समुद्भूतत्वाङ्गीकारेपि नास्ति तथाविधत्वं तत्रभवतः कालिदास्यस्येति सिद्धम् । इति मातृगुप्ताचार्यविचारः ।

इतरे तु वदन्ति—

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि
दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान् ॥

इति मेघदूते कालिदासः प्राह । तत्र च समालोचनमर्यादया निचुलः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कालिदासस्य सहृत्कविविशेषो, दिङ्नागस्तु कालिदासस्य प्रतिपक्षोऽत्यवष्टब्धो हस्तचेष्टया प्रतिवादिनां निर्भर्त्सकः कविरित्यवबुध्यते । एतद्व्याख्यायां मल्लिनाथेनोक्तम् । दिङ्नागस्तु कस्यापि बौद्धपण्डितस्यासङ्गनाम्नश्छात्रः । असंगश्च बुद्धावतारात्परं वत्सराणां नवशत्यां सम्भूत इति तिब्बेटीयेभ्यः पुरावृत्तेभ्यः स्फुटीभवति । किं चायं खिस्तीयेऽष्टसप्तत्युत्तरपञ्चशततमे वर्षे भारतवर्षमलङ्चकारेत्यपि केचित्पुरावृत्तविदः । ततश्च खिस्तीयषष्ठशताब्द्यामेव दिङ्नागाचार्यो बभूवेति स्पष्टतया प्रतीयते । कालिदासोऽपि तस्मिन्नवसरे प्रादुर्बभूवेति । तदेतदापाततो रमणीयम् । सम्भवति प्रमाणानुगते चार्थेऽप्रमाणानुगतार्थकल्पनस्यान्यायत्वात् । यस्मान्मेघेनोदङ्मुखेनोत्पतनीयं तस्मिन्प्रदेशे वेतसानां सरसत्वस्य कल्पनं सयुक्ततममेव, किन्तु निचुलनाम्नः कवेः कल्पने किंवा प्रमाणमिति नैव जानीमः । एवं दिङ्नागशुण्डासादृश्यादिङ्नागस्य कवेरग्रहणात्तस्य कालिदाससमानकालिकत्वे प्रमाणाभाव इत्यपि नात्र विस्मरणीयम् । किं च प्रमाणान्तरमन्तरा मल्लिनाथवचनस्य न शक्यं प्रामाण्यमङ्गीकर्तुम् । अत एव च नास्ति श्रीकालिदासदिङ्नागयोः समानकालिकत्वमिति । इति दिङ्नागविचारः ।

हूणविजयविचारः । अन्ये तु रघुवंशे हूणविजयवर्णनमेव कालिदासस्य खिस्तीयषष्ठशताब्दीसमुद्भूतत्वे प्रमाणमिति प्रवदन्ति । तथाहि । कालिदासेन रघुवंशीये चतुर्थे सर्गे षट्षष्ठितमे पद्ये रघोरुत्तरदिक्प्रयाणमभिधाय सप्तषष्ठितमे च सिन्धुसरिदुपकण्ठेनोदकप्रयाणं निगद्य—

तत्र हूणावरोधानाम् भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥

इति रघुकर्तृको हूणविजयोऽभिहितः । यदेव मूलमादाय कालिदासेन रघुवंशं निरमायि तत्र तु वाल्मीकीयरामायणे न क्वापि हूणनाम्नः श्रवणम् । अतश्चैषां हूणानां कालिदासावस्थानसमये बलीयस्त्वेनाङ्गीकारात्तद्विजयवर्णनेन नायकोत्कर्षं प्रख्यापयितुकामः श्रीमान्कालिदासो रघुवंशे हूणविजयं प्रतिपादयामास । हूणाश्च खिस्तीयपंचमशताब्द्युत्तरमेव भारतवर्षमुपाजग्मुर्व्यजेषत च

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्रत्यान्क्षत्रियोत्तंसानिति प्रसिद्धमितिहासप्रबंधेषु । ततश्च रघोर्हूणविजेतृत्व-मुपवर्णयतः कालिदासस्य खिस्तीयषष्ठशताब्द्यामेव प्रादुर्भाव इति प्रतीयत इति ।

अत्रोच्यते । उक्तिरियमर्वाचीनानामत्यन्तमेव निःसारा । न हि षष्ठशताब्द्यामेव भारतवर्षे हूणा अविद्यन्त न पुनरन्यदेत्यत्र किंचिदपि प्रमाणं दृष्टं प्रत्युत चतुर्थशताब्द्याः पूर्वमेव । अपि ललितविस्तारनाम्नि बौद्धग्रंथे चीनहूणप्रभृतीनां नामानि निर्दिश्यन्ते । ततश्च षष्ठशताब्द्याः पूर्वमपि हूणानां विद्यमानत्वं दुर्वारम् । न च चतुर्थशताब्द्यामेव कालिदाससम्भवोऽस्त्विति-वाच्यम् । हूणानामत्यन्तप्राचीनतमत्वस्य पुराणेतिहासादिभिः सिद्धत्वेन रघावुपवर्णितो विजयोऽर्वाचीनानामेव हूणानामित्यत्र प्रमाणाभावात् । यत्तु हूणाः काश्मीराधिपतयो राजविशेषाः काश्मीराश्च षष्ठशताब्द्यामेव हूणा-यत्ततामुपजग्मुरिति तन्न विचारासहम् । रघुव्याख्याकृता हि मल्लिनाथेन हूणा जनपदाख्याः क्षत्रिया इति व्याख्यातम् । शब्दार्थनिर्णये च व्याख्यानत एव विशेषप्रतिपत्तिरिति हूणदेशाधिपतय एव हूणा न तु कश्मीराधिपतय इति सिद्धम् । हूणदेशाधिपेत्यर्थकस्य हूणशब्दस्य निष्पत्तेः शास्त्रानुगतत्वात्त-दितरहूणशब्दे प्रमाणाभावाच्च । महाभारते आदिपर्वणि हूणशब्दो विद्यते यथा—

चिबुकांश्च पुलिन्दांश्च चीनान् हूणान् सकेरलान् ।
ससर्ज फेनतः सा गौर्म्लेच्छान्बहुविधानपि ॥ इति ॥

किं तु हूणानां कालिदाससमकालिकत्वस्यापि तुष्यतु न्यायेनाङ्गीकारे स्वसमकालिकहूणविजयवर्णने कस्तावद्धेतुः कालिदासस्य । यदि तु हूणानां वीरप्रकाण्डतया तद्विजयेन रघोरुत्कर्षवर्णनमेवात्र निदानमिति प्रोक्ते तदापि न निस्तारः । विश्वामित्रसदृशानां क्षत्रियोत्तंसानां ये विजेतारस्तेषामेव हूणानां पराजय्यत्वेन ग्रहणेपि तथाविधहेतोरसिद्धेः । अतो नव्यग्रहणे हेत्वभावादपि प्राचीनहूणविजय एवोपवर्णितः कालिदासेनेत्यङ्गीकरणीयम् । अपि च हूणानां प्राचीनत्वाभावे कालिदाससमकालिकत्वे च तद्विजयवर्णनं कालिदास-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्यासत्काव्यप्रणेतृत्वमापादयेत् । तथा चासत्काव्यत्वाद्रघ्वादीनामनादरापत्तिः । न च रघुवंशोदन्ते मूलभूते रामायणे रघुकर्तृकस्य हूणविजयस्यानुपनिबन्धनाद्भवन्मतेऽपि रघ्वादीनामसत्काव्यतापत्तिर्दुर्वारेति वक्तव्यम् । हूणानाममतिप्राचीनत्वस्य भारतादिभिः सिद्धतया रघुकालेऽपि तेषां विद्यमानत्वसंभवेनाशेषभुवनजेतुः सार्वभौमस्य रघोस्तद्विजेतृत्वसम्भवात् । संभवमात्रविषयीभूतानां चेतिवृत्तानां कविभिरुपवर्ण्यमानत्वस्य दृष्टत्वात् । कालिदाससमकाल एव विद्यमानानां तु हूणानां नास्ति रघुकाले सम्भवनीयत्वम् । नापि प्राचीनवर्णनप्रसंगे स्वसमकालिकानर्थानुपवर्णयन्ते कवयः । न हि केनापि कविशिरोमणिना नलादीनां चरितं विवर्णयिषुणाऽऽधुनिकनृपविजयस्तत्कर्तृकत्वेनोपनिबद्धो नापि पांडवानां चरितमुपनिबद्धुकामेन प्रथितमपराक्रमाणामवरङ्गजीवादीनां विजयोमिहितः । नाप्यभिधीयते । नाप्यभिधास्यते । हूणानां प्राचीनतमत्वे तु तद्विजयो न दोषायेत्युक्तमेव प्राक् । अन्यच्च रामायणादीनीनिवृत्तमात्रावलम्बीनि काव्यानि । रघुवंशादीनि तु रसमात्रावलम्बीनि । अत एवात्र क्वचिदसतामपि भावानामुपनिबन्धः सतामप्युपनिबन्धाभावश्चेति काव्यानुशासनानुगुणा व्यवस्थेति द्रष्टव्यम् । अत एव चोदात्तराघवे वालिवधानभिधानं कुमारसंभवकिरातार्जुनीयादौ च भूरिशृंगारोपवर्णनं संगच्छते । महाकाव्ये च नायकस्याभ्युदयो विस्तरशो वर्णनीय इति कवीनां समयः । उपवर्णयन्तश्च नायकाभ्युदयं महाकवयो यं यं भावं नायकसमये संभवनीयं पश्यन्ति तंतमुपवर्णयन्ति । सत्यप्येवं नायकसमयेऽसम्भवसद्भावा नोपनिबध्यन्तेऽर्थाः कविप्रवरैः ।

एवं च हूणानां प्राचीनतमत्वस्य भारतादीतिहाससिद्धतया षष्ठशताब्दीमात्रसम्भूतत्वे प्रमाणाभावात्कविसमकालिकानामेवार्थानामुपवर्णने काव्यस्यासत्त्वापातात्कालिदासस्य च सत्कवित्वान्नांशतोऽपि रघुवंशीयहूणवर्णनात्कालिदासस्यार्वाचीनतापत्तिः । अत एव च न कालिदासस्य षष्ठशताब्द्यां प्रादुर्भाव इति हूणविजयवर्णनविचारः ।

जामित्रशब्दविचारः । केचित्तु कुमारसंभवेनैव कालिदासस्य कालं निर्णेतुमिच्छन्ति । तथाहि कुमारसंभवे सप्तमसर्गे प्रथमं पद्यम्—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अधौषधीनामधिपस्य वृद्धौ तिथौ च जामित्रगुणान्वितायाम् ।
समेतबन्धुर्हिमवान्सुताया विवाहदीक्षाविधिमन्वतिष्ठत् ॥

अत्र च विद्यमानो जामित्रशब्दो ग्रीकभाषावर्तिनो डायमेट्रनशब्दस्यापभ्रंशः । यदा किल भारतीया ग्रीकेभ्यो ज्योतिःशास्त्रमधिजगिरे तदैव ग्रीकभाषातः संस्कृतभाषायां प्रविष्टोऽयं शब्दः । यैः पुनरार्यपंडितैः ग्रीकेभ्यो ज्योतिषमधीतं तेष्वार्यभट्ट एव प्रथम इति स्वीयप्रबन्धे जामित्रशब्दमुपनिबध्नतः सुस्पष्टमेव कालिदासस्यार्यभट्टतोऽर्वाचीनत्वम् । आर्यभट्टश्च खिस्तीयपंचमशताब्द्यामुत्पन्न इति ततोऽर्वाचीनस्यार्थादेव षष्ठशताब्द्युत्पन्नत्वं कालिदासस्येति ।

स्यादेतद्यदि जामित्रशब्दो डायमेट्रशब्दस्यापभ्रंश एव स्यात् । तदा ह्यपभ्रंशत्वं शब्दानामङ्गीकरणीयं यदा स्वाभिमतभाषायां नैते व्युत्पादयितुं शक्येरन् । नैव पुनर्जामित्रशब्दस्य तथात्वं दृष्टम् । शक्यते ह्ययं संस्कृतभाषायां व्युत्पादयितुम् । प्रयुक्तश्च प्राचीनतमैर्मुनिभिः । व्युत्पत्तिस्तावज्जामिं स्त्रियं जायामिति यावत् त्रायत इति जामित्रमिति । तच्च लग्नात्सप्तमं स्थानमिति ज्यौतिषिकाणां परिभाषा । तत्रैव हि जायाविषयकं शुभाशुभं पर्यालोच्यत एतैः । जामिशब्दश्च श्रुतिष्वपि प्रयुक्तो दृष्टः । ज्योतिश्शास्त्रेषु जामित्रशब्दः सप्तमस्थानवाचीत्युक्तम् । तथा हि जातकालङ्कारे जामित्रमस्तं स्मरमदनमदद्यूनकामाभिधानम् । इति सप्तस्थानपर्यायेषु प्रोक्तम् । इति जामित्रशब्दविचारः ।

अथ ग्रहणकल्पनाविचारः । केचित्तु रघुवंशत एव कालिदासावस्थितिसमयं निर्णेतुमभिलष्यन्तः प्राहुः । यथा—रघुवंशीयचतुर्दशसर्गान्तर्गते चत्वारिंशत्तमे पद्ये 'छाया हि भूमेः शशिनो मलत्वेनारोपिता शुद्धिमतः प्रजाभिरिति कालिदासेन परमार्थत एवोपरागे उपावर्णि । अत्र पृथिव्याश्छाया अनातपः शशिनश्चन्द्रस्य मलत्वेन ग्रहणत्वेनारोपिता । शशिनि प्रतिबिम्बितां भूमेश्छायामेव लोका ग्रहणत्वेन व्यपदिशन्तीत्यर्थः । एष ह्युपरागवृत्तान्तो ग्रीकेभ्य एवार्यभट्टेनोपात्तः । यच्च कालिदासः स्वप्रबन्धेष्वर्थमिममुपनिबध्नाति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदेष आर्यभट्टादर्वाचीन इत्यत्र नास्त्यंशतोऽपि सन्देह इति । स्याद्यदि पद्येऽस्मिन्नुपरागवर्णनसम्बधस्तदा स एव तावद्गगनकुसुमायमानः । यतो मलशब्दः कलङ्कवाच्येव । कलङ्को हि भूमिच्छायाद्यात्मकत्वेनोपवर्णनीय इति महकवीनां समयः । स चात्र कालिदासेनानुसृतः । यथा मालविकाग्निमित्रेऽपि चतुर्थेऽङ्के

कदा मुखं वरतनु कारणादृते तवाननं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी कथय कथं भविष्यति ॥

यदि तिरस्कृत्य कोशादीन् क्षितिवाचकत्वमेव ग्रहशब्दस्याङ्गीक्रियते तदा यत्रतत्र ग्रहशब्दघटितेन वाक्येन ग्रहणवर्णनं तत्रतत्र क्षितिवाचकत्वमेव ग्रहशब्दस्याङ्गीकर्तव्यम् । अर्धजरतीयन्यायानुसरणस्यान्याय्यत्वात् । तथा च भगवता वाल्मीकिना अयोध्याखण्डे—

"पिता हि राज्ञा काकुत्स्थः श्रीमान्सन्नस्तदा बभौ ।
परिपूर्णः शशी काले ग्रहेणोपप्लुतो यथा ॥"

कालिदासस्तु राहुणैव शशिग्रासं समभंस्त न तूपरागे क्षितिच्छायायाश्चन्द्रबिम्बे संक्रातत्वम् । यथा रघुवंशे—

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥

केचित्पुनरविभावितविशेषाः प्राचीनमात्रे सुदृढं विश्वसन्तो ज्योतिर्विदाभरणनाम्ना प्रबन्धेन श्रीमतः कालिदासस्यावस्थितिसमयं निर्णेतुमिच्छन्ति । प्राहुश्च - अस्ति किल श्रीकालिदासप्रणीतो ज्योतिर्विदाभरणसंज्ञो ज्योतिशास्त्रग्रन्थः । तत्र च सुस्पष्टमेवोल्लिखित आत्मनोऽवस्थानावसरः श्रीकालिदासेन । तदुक्तं तत्रैव—

"काव्यत्रयं सुमतिकृद्रघुवंशपूर्वं जातं यतो ननु कियच्छ्रुतिकर्मवादः ।
ज्योतिर्विदाभरणकालविधानशास्त्रं श्रीकालिदासकवितो हि ततो बभूव ॥

किन्तु प्रकारान्तरेणाप्ययमेव समयः स्फुटिभवति । तथा हि श्रीमद्विक्रमादित्यमहीपालस्य सभायां प्रविलसत्सु नवसु रत्नेष्वन्यतमः कविः श्रीकालिदासो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नाम । तदुक्तं ज्योतिर्विदाभरणे—

धन्वन्तरिः क्षपणकामरसिंहशंकुवेताळभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥
इति ॥

श्रीमद्विक्रमादित्यराज्यसमय एव च निर्मितं ज्योतिर्विदाभरणं कालिदासेनेत्येतदपि स्फुटीभवति । एवं विक्रमसमानकालिकतयापि कालिदासस्य खिस्तीयशकारम्भतः पूर्वं प्रथमशताब्द्यां विद्यमानत्वं सुस्पष्टम् । तथापि बलवत्तरैः प्रमाणैः ज्योतिर्विदाभरणप्रणेतुः द्वादशशताब्द्यां प्रादुर्भावस्य स्पष्टतया कालिदासस्य च ततोऽतिप्राचीनत्वस्य प्रमाणान्तरैः साधितत्वान्नास्ति तत्प्रणीतत्वं ज्योतिर्विदाभरणस्य ।

किंचोपरि निर्दिष्टानां ज्योतिर्विदाभरणपद्यानां रचनाप्यनुमापयति तस्य रघुवंशादिकर्तृजन्यत्वाभावम् । क्व खलु सहृदयानाम् हृदयान्यसङ्गीतकमेव नर्तयन्ती महाकवेर्वाणी क्वापि वाऽप्रगल्भगतिभिरपि सुदूरोज्झितगुणानि कविमन्यैरकविभिरप्यनुपनिबन्धनीयानि ज्योतिर्विदाभरणपद्यानि क्व च मन्दः कवियशः प्रार्थी त्यादिना व्यज्यमानः कविचूडामणेर्विनयातिशयः क्वापि वा काव्यत्रयं सुमतिकृदित्यादिना ध्वन्यमान आत्मनः कृतिं प्रत्यभिमानः । क्व वा निरर्थकपदशून्यानि रससान्द्राणि तत्तादृशानि रघुवंशादिकाव्यगतानि पद्यानि क्वापि वा रत्नानि वररुचिरिति विक्रमार्कनृपराजवर इत्यादीनि निरर्थकपदजालपरिपठितानि वचनानि । तन्न जानीमः कथमेतज्ज्योतिर्विदाभरणं कविप्रकाण्डविरचितमिति स्वीकुर्वते विद्वांस इति । तदेवं ज्योतिर्विदाभरणस्य कालिदासप्रणीतत्वाभावेन तस्य तत्कालनिर्णये नास्ति मनागप्युपकारित्वं प्रामाण्यंवेति सिद्धान्तः । तथापि श्रीकालिदासकालनिर्णये तस्य प्रामाण्यमभ्युपगन्तव्यम् । अतो ज्योतिर्विदाभरणकारेणापि कालिदासात्मकत्वमुपलब्धुकामेन पारमार्थिकं कालिदासावस्थितिसमयादिकं समवबुद्धमित्यवश्यमङ्गीकरणीयम् ।

केचित्तु शकर्कर्तुः महीपालशेखरस्य श्रीविक्रमादित्यस्यैव सभायां बभूव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कविप्रवरः श्रीकालिदासः । स च महीपतिः खिस्तीयसंवत्सरारम्भतः पूर्वमेव प्रादुर्बभूवेति शक्यते । अतः कालिदासस्यापि खिस्तीयवत्सरारम्भतः प्राचीनत्वं व्यवस्थाप्यत इति प्राहुः ।

तदपरे न मन्यन्ते । ते हि प्रवदन्ति । आसीत्किल पुरा कण्णीकोनाम कोऽपि भूपालः । तमारभ्य तद्वंशे त्रिंशोयं नृपतिः श्रीविक्रमादित्यः । कण्णीकश्च खिस्तीयाष्टसप्ततितमे वत्सरे भारतवर्षमलमकार्षीत् । तदुत्तरोत्पन्नत्वाच्च नास्ति श्रीविक्रमादित्यस्य खिस्तीयवत्सरारम्भतः प्राचीनत्वम् । हुएन्मंग इत्याख्यस्तु कश्चन चीनयात्रिकः ५८० तमे शाके श्रीशिलादित्यस्तदुत्तरमेव च श्रीविक्रमादित्यो बभूवेत्याहस्म । ततोऽपि नास्ति खिस्तीयवत्सरारम्भः प्राचीनत्वं विक्रमादित्यस्य । विक्रमादित्यस्य कालिदाससमानकालिकत्वाङ्गीकारेऽपि नैव सिध्यति प्राचीनत्वम् । अतः खिस्तीयसंवत्सरारम्भतः सुतरामर्वाचीनः श्रीविक्रमादित्यः ।

अपरे तु तमेवार्थं प्राहुः । विक्रमादित्यो म्लेच्छाञ्जिगायेति । समरश्चायं कोरूनगरसमीपत एव सम्पन्नः । तदानीन्तनः शिलालेखः म्लेच्छपराजेतृत्वं सूचयति । अतश्च सर्वथा खिस्तीयषष्ठशताब्देव समयो विक्रमादित्यस्येति संसिद्धमितिप्रभावने । सम्भवन्ति तु समाननामानः समानगुणाः प्रथितयशसश्च भूयांसः पुरुषाः । समुल्लिखितं च भूयिष्ठैः प्रबन्धकारैर्विक्रमादित्य इतिपदं संज्ञात्वेनैव । केचित्तु संज्ञावाचिनोऽपि पदस्योत्तरपदपरिवृत्तिसहिष्णुतामङ्गीकुर्वाणा विक्रमार्क इत्यर्थे विक्रमादित्य इत्यपि प्रयुञ्जते ।

विदितमेव पुराणवृत्तविदां रघुपुंगवस्य पुत्रेण लवदेवेन शरावतीनामात्मनो राजधानी निरमायि । इयमेव जन्मभूमिर्बुद्धदेवस्येति सुप्रथितं बौद्धप्रबन्धेषु । तत्र च खिस्तीयवत्सरारम्भतः पूर्वं सप्तञ्चाशे वत्सरे विद्यमानं कमपि बौद्धभूपालं पराजित्यात्मसात्कारायोध्यां विक्रमादित्यः । अवसरे चास्मिन् विक्रमादित्यस्योज्जयिनी नाम नगर्येव राजधानी बभूव । महाकविः कालिदासोऽपि खिस्तीयवत्सरारम्भतः प्राक् प्रथमशताब्द्यामेव धरणीमण्डलं मण्डयामासेति प्रतिपाद्यते । स चोज्जयिन्यामेव न्युवास । अत एव चालञ्चकार विक्रमादित्यस्य परिषदं कवीन्द्रः कालिदास इति लोकप्रवादे नैकान्ततो निरालम्ब इति सर्वमनवद्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परिहासविजल्पितम्

(ले.—गल्लगलीपण्ढरीनाथाचार्यः)

विज्ञानाध्यापकः— भूमिः परिभ्रमति, उत सूर्यः ?

विद्यार्थी— उभावपि न भ्रमतः । किन्तु उपक्रान्ते भवत्पाठशिक्षणे अस्माकं शिरांस्येव परिभ्रमन्ति .

× + ×

उपाध्यायः—पुराविद्यार्थिनः स्वगुरून् बहुमानयन्ति स्म, पूजयन्ति स्मच ।

विद्यार्थी—तदानीन्तना उपाध्याया अपि छात्रान् पुत्रनिर्विशेषं पश्यन्तिस्म, तेषु तथा स्निह्यन्ति स्म च ।

× + +

इतिहासशिक्षकः—अत्ररंगजेबः कीदृशः आसीत् ?

छात्रः— महाविवेकशाली

शिक्षकः— कथं रे मूर्खः ?

छात्रः— यतो हि तेन स्वगुरुः दृढं बध्वा कारायां निक्षिप्तः ।

+ + +

गुरुः— रवीन्द्रनाथठाकूरमहाशयस्य बाल्य एव तादृशबुद्धिविकासस्य को वा हेतुः ? ।

शिष्यः— तेन न कदापि शालांप्रतिगतम । नापि शालेयशिक्षकाणां सर्वथा प्रतिभाप्रसरप्रतिबन्धके दुश्शासने न स्थितम् ।

+ + +

शिक्षकः—जगति अत्यन्तकाठिणतमं वस्तु किम् ?

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शिष्येषु प्रथमः—लोहः

द्वितीयः —शिला

तृतीयः— एतदुभयमपि न तावत्कठिणम् ।

शिक्षकः (सविस्मयक्रोधावेशम) तर्हि किमन्यत् ?

तृतीयः—अत्र पद्यमेकं मया विरचितं वर्तते ।

शिक्षकः—(सकोपाटोपम्) तदपि तूर्णं जल्परे !

तृतीयः—(स्मृतिमभिनीय)

लोहः कठिणो नूनं वज्रं कठिणं शिलापि कठिणैव [
कठिणात्कठिणतरं तत् शिक्षकलोकस्य निर्दयं हृदयम् ॥

+ + ×

अध्यापकः— सकलगवेषकाग्रगण्येन 'न्यूटन्' महाशयेन आविष्कृत गुरुत्वाकर्षण शक्ति र्नाम किम् ? ।

छात्रः— अध्यापनकलानभिज्ञे गुरौ विद्यमानस्य गुरुत्वस्य आकर्षणाय चतुरशिष्यैःया शक्तिः, यच्च सामर्थ्यं, यदपि धैर्यं प्रदर्श्यते, तद् गुरुत्वाकर्षण-शक्तिरित्युच्यते ।

+ + +

गुरुः— यवनराजेषु को मूर्खः ? ।

शिष्यः—तघ्रलकोपाभिधो महम्मदः

गुरुः— कुतः ? ।

शिष्यः— तेन न कदापि यवनेनापि पाकिस्तानार्थं प्रयतितम् ।

+ + +

इति विनोदसागरे गुरुशिष्यसंवादो नाम प्रथमस्तरङ्गः ।

———

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दोषोऽत्र नः कीदृशः

(लेखिका—सौ. सुलोचनादेवी)

'मधुरवाण्या' अङ्केषु मम, सौभाग्यवत्या ललिताया, उर्मिलादेव्याश्च सरसान् सहृदयहृदयङ्गमान्, रसिकलोकमूर्ध्नीन्दोलनचणान् हृदयालुजनस्य रसचर्वणकलाकुशलं मानसमानन्दसुधासागरे समाप्लाव्य नयनारविन्दाभ्यामानन्दबाष्पकणस्यन्दकान् सहजतया परवशतया वा मुखकमलतः सहसाम्रेडितसाधुवादानाविर्भावयतो लेखानापाततो निरीक्ष्य अदूषयन् केचन वृद्धाः धिगकुर्वन् विरक्तशिखामणयः, तिरोकुर्वन् वैराग्यचर्यानटनपटवः; अनिन्दन् रसास्वादनकलांगन्धविधुराः; अवागणयंश्च वेदान्तविद्यापरिनिष्ठिता महानुभावाः; अवाहेलयन् साहित्यमर्मानभिज्ञाः; अवाधीरयन् वनितानां विशेषतो विदुषीणां, तत्रापि सरसगद्य—पद्यमयकाव्यरचनापटीयसीनां चित्ताकलनचातुरीदूरीभूताः सहजविचारलहरीविलखितमजानानाः समुद्रिच्यमानकोमलभावनाप्रभावाभिज्ञानशून्याः स्वभावपरीक्षणविद्यापरीक्षानुत्तीर्णा जना इति दूरादेव श्रूयते। दुनोति चेतः, विक्लवीभवति मनः, निरुत्साहतामयते चित्तम्, कर्तव्यपराङ्मुखतोन्मुखं भवति हृदयम्, स्त्रीलेखप्रकाशने बिभेति मानसम्, अरसिकजनावहेलनभयादुद्विजते च स्वान्तम्, संपादकानामित्यपि समवगम्यते कर्णाकर्णिकया। तदेतस्य विप्लवाभासस्याहमेव हेतुतामगच्छमिति क्षणं चेखिद्यते चेतः।

अथवा मम सख्योर्वाऽत्र को वा दोषः। स्यान्नामापराधोऽत्रेदृशस्त्रीस्वभावविधानस्वभावस्य भगवतो विधातुः। अत्र कामं निन्दन्तु नाम निसर्गतो वैराग्यपथावलम्बिनो, वेदान्तसन्ततगृहीतरसा, ब्रह्मविचारैकमग्नाः गलितदेहां दलितसुखदेहाः स्खलितगतयः चलितमतयो वर्षीयांसश्च। तेन नेषदपि मे कोऽपि विषादः। यत्सकोपाटोपं साभंटमपहसन्ति, दूषयन्त्यवहेलयन्ति धिक्कुर्वन्ति वा तदवलोक्य हास एव समुन्मिषति मे। तेषां वैराग्यप्रदर्शनं किमु नन्दानि, किं वा अरसिकतां निन्दानि, अथवा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लेखस्वारस्यानभिज्ञतामपहसामि, साहित्यपर्याकलनवैधुर्यं शोचामि, आहोस्वित् कवयित्रीस्वभावावगममन्दताममन्दमवक्रन्दामि, अथवा प्राचीनकवयित्री-कवितानां निरीक्षणाकलनविमर्शन वैमुख्यादिदोषान् दूषयामि ? । किमपि न जानाम्यहम् स्वदोष मनाकलय्येतरगुणान् दोषत्वेन परिगणयद्भ्यस्तेभ्यो महाशयेभ्यो दूरादेव नमोवाकं प्रशास्महे । तेषामरासिक्येन संपूर्णलेखाननु-वाच्य पूर्वापरसन्दर्भमनालोक्य मध्ये आपाततो रसाभासवत्तया भासमानान्येव वाक्यानि समुद्धृत्य दोषप्रदर्शनेन का वा हानिः सरसलेखानाम् ? । 'कण्टकप्रियैः क्रमेलकैरनास्वादने का वा विरसता कदलीफलानाम् ? ।' अतो नात्र मे कोऽपि मनसोऽप्रसादः । न सख्योर्विषादः । नापि संपाद-कमहाशयैः किञ्चिदपि विमनायितव्यम् । यतोऽनश्लीलशृङ्गारं स्वानुभूतं वस्तुचित्रणं रसिकैराद्रियत एवेति ।

शृङ्गारसङ्गिन्यः कव्यङ्गनाः

ले.—रसिकः

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपाः
तेचोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ?
सा चैवाऽस्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ १ ॥

अन्यासु तावदुपमर्दसहासु भृङ्ग !
लोलं विनोदय मनः सुमनोलतासु ।
बालामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमल्लिकायाः ॥ २ ॥

धन्याऽसि या कथयसि प्रियसंगमेऽपि
विस्रब्धचाटुशतकानि रतान्तरेषु ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नीवीं प्रति प्रणिहिते तु करे प्रियेण
सरव्यः शपामि यदि किञ्चिदपि स्मरामि ॥ ३ ॥
सुरताय नमस्तस्मै जगदानन्दहेतवे ।
आनुषङ्गि फलं यस्य भोजराज! भवादृशाः ॥ ४ ॥

त्रिभुवनसरस्वती

वयं वान्ये बालांस्तरुणिमनि यूनः परिणता—
वपीच्छामो वृद्धांस्तदिह कुलरक्षा समुचिता ।
त्वयाऽऽरब्धं जन्म क्षपयितुमनेनैकपतिना
न नो गोत्रे पुत्रि क्वचिदपि सतीत्वांछनमभूत् ॥ ५ ॥

विद्यादेवी

किं पादान्ते पतसि विरम स्वामिनो हि स्वतन्त्राः
कञ्चित्कालं क्वचिदसि रतस्तेन कस्तेऽपराधः ? ।
आगस्कारिण्यहमिह मया जीवितं त्वद्वियोगे
भर्तृप्राणाः स्त्रिय इति ननु त्वं मयैवानुमेयः ॥ ६ ॥

भावदेवी

उत्पातकेतुरिव मन्मथनायकस्य
वज्रप्रहार इव केलिलतावनस्य ।
संहारकाल इव पान्थवधूजनस्य
ग्रीष्मस्य भाति दिवसः सखि! दूरिताशः ॥ ७ ॥

गौरी

सुखशय्या ताम्बूलं विस्रब्धाश्लेषचुम्बनादीनि ।
तुलयन्ति न लक्षांशं त्वरितक्षणचौर्यसुरतस्य ॥ १८ ॥

कुलटा

दुर्दिननिशीथपवने निस्सञ्चारासु नगरवीथीषु ।
पत्यौ विदेशयाते परं सुखं जघनचपलायाः ॥ ९ ॥

जघनचपला

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

आकारेण शशी गिरा परभृतः पारावतश्चुम्बने
हंसश्चङ्क्रमणे समं दयितया रत्या विमर्दे गजः ।
इत्थं भर्तरि मे समस्तयुवतिश्लाघ्यैर्गुणैः किंचन
न्यूनं नास्ति परं विवाहित इति स्यान्नैकदोषो यदि ॥१०॥

मधुरवाणी

गोपायन्ती विरहजनितं दुःखमग्रे गुरूणाम्
किं त्वं मुग्धे ! नयनविसृतं बाष्पपूरं रुणत्सि ।
नक्तंनक्तं नयनसलिलैरेष आर्द्रीकृतस्ते
शय्योपान्तः कथयति दशामातपे शोष्यमाणः ॥११॥

मारुलादेवी

यामीत्यध्यवसाय एव हृदये बध्नातु नामास्पदम्
वक्तुं प्राणसमासमक्षमघृणेनेत्थं कथं पार्यते ? ।
उक्तं नाम तथापि निर्भरगलद्बाष्पं प्रियाणां मुखम्
दृष्ट्वापि प्रवसन्त्यहो धनलवप्राप्तिस्पृहा मादृशाम् ॥१२॥

मोरिकादेवी

विरहविषमो वामः कामः करोति तनुं तनुम्
दिवसगणनादक्षश्चायं व्यपेतघृणो यमः ।
त्वमपि वशगो मानव्याधेर्विचिन्तय नाथ ! हे
किसलयमृदुर्जीवेदेवं कथं प्रमदाजनः ॥१३॥

शीलाभट्टारिका

मा भैः शशाङ्क ! मम शीधुनि नास्ति राहुः
खे रोहिणी वसति कातर ! किं बिभेषि ? ।
प्रायो विदग्धवनितानवसङ्गमेषु
यूनां मनः प्रचलतीति किमत्र चित्रम् ? ॥१४॥

शीतादेवी

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दृष्टिं हे प्रतिवेशिनि ! क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलम्
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥१५॥

विज्जिका

कान्ते तल्यमुपागते विगलिता नीवी स्वयं बन्धनात्
वासश्च श्लथमेखलागुणधृतं किञ्चान्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि केवलमहं तस्याङ्गसङ्गे पुनः
कोऽसौ काऽस्मि रतं च कीदृशमिति स्वल्पापि मे न स्मृतिः ॥१६॥

विकटनितम्बा

कुलीन स्वाधीन भ्रमणपरिहीन प्रियतम
क्षमासिन्धो साध्वीशरण करुणाभाजन विभो ।
अधीदानीमस्याः कुरु करुणमिन्दीवरदृशो
दशेयं प्राणेश क्षणमपि विलम्बं न सहते ॥१७॥

काचित्

स्नेहं परित्यज्य निपीय धूम्रं
कान्ताकचा मोक्षपथं प्रपन्नाः ।
नितम्बसङ्गात्पुनरेव बद्धा
अहो दुरन्ता विषयेषु सक्तिः ॥१८॥

सुभद्रादेवी

नाभौ विलान्तरविनिर्गतपन्नगीयम्
संप्रस्थिता नयनखञ्जनभञ्जनाय ।
नासामुदीक्ष्य गरुडभ्रमवारणाय
गुप्तेव कुम्भकुचपर्वतयोरधस्तात् ॥१९॥

लक्ष्मीदेवी

यत्तव सती जाया असत्यो यश्च सुभग वयमपि ।
तत्किं स्फुटतु बीजं तव समानो युवा नास्ति ॥२०॥
दृढमूलबन्धग्रन्थी इव मोचितौ कथमपि तेन बाहू ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अस्माभिरपि तस्योरसि निखाताविव समुत्खातौ स्ततौ ॥२१॥

अनुलक्ष्मी

साखि व्यथयन्ति कदम्बानि यथा मां तथा न शेषकुसुमानि ।
नूनमेषु दिवसेषु वहति गुटिकाधनुः कामः ॥२२॥
नाहं दूती न त्वं प्रिय इति कोऽस्माकमत्र व्यापारः ।
सा म्रियते तत्रायशस्तेन च धर्माक्षरं भणामः ॥२३॥

असुलभा

किं तदपि हा विस्मृतं निष्कृप ! यद् गुरुजनस्य मध्येऽपि ।
अभिभाव्य गृहीतस्त्वं स्रस्तोत्तरीयया ॥२४॥
क्षणमात्रकलुषिताया लुलितालकवल्लरीसमवस्तृतम् ।
भ्रमरभरावनतं पङ्कजमिव स्मरामि मुखं तस्याः ॥२५॥

अवन्तीसुन्दरी

गोपायन्ति ये प्रभुत्वं, कुपितां दासत इव ये प्रसादयन्ति ।
त एव महिलानां प्रियाः, शेषाः स्वामिन एव वराकाः ॥२६॥

माधवीदेवी

एकं प्रहारोदिग्नं हस्तं मुखमारुतेन वीजयन् ।
सोऽपि हसन्त्या मया गृहीतो द्वितीयेन कण्ठे ॥२७॥

काचित्

किं तावत्कृता अथवा करोषि करिष्यसि सुभगेदानीम् ।
अपराधानामलज्जाशील कथय कतमे क्षम्यन्ताम् ॥२८॥
अवलम्बितमानं पराङ्मुख्या आगच्छतो मानिनि प्रियस्य ।
पृष्ठपुलकोद्गमस्तव कथयति सम्मुखस्थितं हृदयम् ॥२९॥

रेवादेवी

येन विना न जीव्यतेऽनुनीयते स कृतापराधोऽपि ।
प्राप्तेऽपि नागरदाहे भण कस्य न वल्लभोऽग्निः ॥३०॥

रोधादेवी

यथायथा वादयति प्रियस्तथा तथा नृत्यामि चञ्चले प्रेम्णि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वल्ली वलयत्यङ्गं स्वभावस्तब्धेऽपि वृक्षे ॥३१॥

शशिप्रभा

एतानि पद्यानि पद्माक्षीणां स्वभावतः शृङ्गारप्रियत्वं साधु स्पष्टयन्ति । शब्दकोशोऽपि स्त्रीणां कामिनीशब्दवाच्यतां व्याहरन्नेतदेव स्फुटीकरोतीत्यलं पल्लवितेन ।

अमदाबादरायपूर सं. पाठशालामहोत्सवः

अहमदाबादरामपूर सं. पाठशालायाः द्वात्रिंशत्तमं महाधिवेशनं चैत्रकृष्णाऽष्टम्यां तिथौ भानुवासरे स्वस्थाने शालीयव्यवस्थापकाः न्ययुञ्जत । निर्णीतसमयात् प्रागेव सभासदनं पण्डितप्रोफेसरछात्रवृन्दैः संकुलं सर्वतो विराजतेस्म । प्रमुखस्थानाय प्रमुखशास्त्रिणा निहिते प्रस्तावे श्रेष्ठिकुलावतंसकनुभाईमहोदयेन चानुमोदिते सति सभाध्यक्षस्थानमलमकुर्वत श्रीमद्वालाभाई गिरिधरदत्तश्रेष्ठिमहोदयाः । कार्योपक्रमे शालीयान्तेवासिनः सुमधुरस्वरेण भारतमातुर्मंगलं विधाय गुरुशिष्ययोः संवादं, भक्तप्रल्हादसंवादं, भाषणादिविधिञ्च समुदचरन् विशदगीर्वाणवाचैव, यथा श्रोतृजनानिवहा दत्तैकचित्तारसानिर्भरभृतः क्षणमिव गतं बहुकालमपि नाविदुः । प्राध्यापकमहोदयेन काशीकलिकत्तापरीक्षाफलं निर्दिष्टं, यद्गताब्दे (२००१ तः २००२) चत्वारिंशत् पञ्चत्रिंशच्च छात्राः क्रमेण समुदतरन् । प्रधानमन्त्रिणा माणिकलालेन श्रेष्ठिना पटेलरतिलालेनोपमन्त्रिणा च द्रव्यायव्ययसूचकं भाषणं विहितम् । पश्चाशत्प्रमुखमहोदयाः स्वहस्तेन समस्तछात्रेभ्यः पुस्तकपारितोषिकं, संवादकर्तृभ्यो रूप्यकदशकं पाठशालायै चैकपंचाशद्रूप्यकानुपहारत्वेन सहर्षमदुः । ततः प्रोफेसरदूरकालमहोदयाः पण्डितशङ्करप्रसादमिश्राः दवेप्रोफेसरमहाशयाः पं. सतीशचन्द्रनैयायिकाः पंडितहरेरामशर्माद्यनेकवक्तारश्च विविधानि भाषणानि साम्यवादनिषेधकानि व्यधुः । प्रान्ते च प्रमुखपुष्पोपहारविधिविधानानन्तरं शास्त्रिमोहनलालशर्मा समागतान् सर्वान् प्रणतिपूर्वकं साभारं प्रदर्श्य सभां व्यसृजत ।

ले.—शास्त्रीगिरिजाशंकरनाथजीभाई
प्रधानाध्यापकः
श्री अमदाबाद संस्कृत पाठशाला, रायपूर.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कवयित्री

सम्राज्ञी देवी तिरुमलाम्बा

ले०—पं० बुर्ली श्रीनिवासाचार्यः, मधुरवाणी सम्पादकः बेल्गांव.

धन्या किल भारतभूरियम् या रत्नगर्भा वसुन्धरा चेति चिरादेव जगति जेगीयमाना महेन्द्रभुवने नन्दनवनविहारसुखमनुभवताममराणामपि कर्मभूमितया जन्मग्रहणाभिलाषमुत्पादयति । यत्र च वेदकालादारभ्य ललना अपि सुललितगद्यपद्यरचनाचतुराः सुरसरस्वतीसेवारसिका रसिकहृदयेभ्यो ह्यमन्दानन्ददायिन्यः स्वयमानन्दसिन्धुनिमग्ना निमज्जयन्ति विद्वज्जनानमृतमयापारकाव्यपारावारे । तत्रापि दक्षिणभारते विशालोऽयं कर्णाटकः कर्णताटंकायमानस्सर्वेष्वपि विषयेषु सुप्रसिद्धश्चिरायापीत्यत्र सर्वथा नास्ति विप्रतिपत्तिः । न केवलं पुरुषा एव किन्तु योषितोऽपि वैदुष्येण वैभववत्तया शौर्येण धैर्येण वीर्येण पराक्रमेण रासिक्येन औदार्येण सौहार्देनातिथ्यप्रियतया वचोमाधुर्येण सौन्दर्येण तथा अन्यान्यैरपि अनुपमैरुदारतरैर्गुणगणैरतितरां कीर्तिं समपादयन्निति महीयानभिमान आनन्दश्चास्माकम् ।

तासु सुप्रसिद्धा एका महाभागा सम्राज्ञी देवी तिरुमलाम्बा नाम्नी सुललितपदविन्यासमनोहरम् अतिसरसं काव्यरत्नं निर्माय आसुधाकरतारकं कीर्तिमरक्षत् कर्णाटकस्य । इयमतिसुन्दरकाव्यनिर्माणचतुरा इति नामाप्यस्याः कर्णाटकस्था अपि न जानन्तीत्यहो दौर्भाग्यमस्मदीयानाम् । वंगभूषणः श्रीमान् सुप्रसिद्धो हरदयाळनागमहाभागो बंगाल्देशाद् विप्रकृष्टं प्रदेशमिमं कर्णाटकमभ्येत्य ऐहोळी इति सुप्रसिद्धं स्थानमुपेत्य तत्रत्यान् विपुलान्देवालयान् तत्रत्यां शिल्पचातुरीं शिलालेखान् अवलोक्य च परमानन्दतृप्तः इतः प्रागनभिज्ञाताः मे हृदयमभिव्याप्य निरूढा अशान्तिहेतवो बह्व्यः शंका अत्रत्यानां शिल्परेखाणामवलोकनात् समूलं विच्छिन्ना इति वदन् अविरलमानन्दबाष्पमभिवर्षन् समनृत्यदिति सुहृद्वरात्तत्र विद्यमानाद्वयमशृण्म तदानीम् । परमेतादृशमपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रदेशविशेषमनवलोकयंतो न विरलाः कर्णाटके । अथवा "सन्निकर्षो हि मर्त्यानामनादरणकारणम् । गांगं हित्वा यथान्येभ्यः शुद्ध्यर्थमुपयाति हि ।" इति सुष्ठूक्तम् विद्वद्वरैः । आस्तां नाम एतत् ।

इयं किल देवी तिरुमलाम्बा का कुत्रत्या किं वा ग्रन्थरत्नं निर्ममे कीदृशं च तन्मनोहरमिति संप्रति प्रियवाचकानामर्थे किंचिदेव निवेदयामो वयम् । कर्णाटके सुप्रसिद्धं हि विजयनगरसाम्राज्यम् इतिहासे । यत्र च धर्माभिमानोज्ज्वला वेदशास्त्राभिमानिनो दुर्म्लेच्छानां धर्मद्रोहिणाम् असुरराक्षसादीनां शिरःकर्तनोद्यतनिशितकरवालशालिनो भारतविद्रोहिणां रुधिरासारेण भूमातरमभिस्नपयन्तः प्रजापालनैकतत्पराः कीर्तिव्यापृतामरलोकाः स्वर्विलासिनीगीतयशसः सहस्रशः शूरा भूमण्डलमिमं मण्डयामासुरनल्पाः । तेष्वेव सुप्रसिद्धः श्रीमान् अच्युतदेवरायो नाम सार्वभौमप्रवरः । तस्येयमग्रमहिषी सम्राज्ञी देवी तिरुमलाम्बा । योषामणिरियं विदुषी स्वयमनेकशास्त्राभ्यासकुशलमतिरनल्पान् विविधशास्त्रपारावारपारीणान् अनवरतं बहुविधसम्मानदानादिभिः सत्कुर्वती समरक्षदिति तच्चरित्राज्जानीमो वयम् । अनेकानि काव्यानि कान्तकामिनीयं कृतवतीति विज्ञायते । परं तानि सर्वाणि कुत्र वा धूलिधूसरितानि पतितानि आहोस्वित् कीटमुखावलीढावयवानि भग्नान्येवेति न ज्ञायते । परमत्र कर्णाटके उत महाराष्ट्रे—आंध्रे—द्राविडादिदक्षिणदेशे निवासिन उत उत्तरभारतीया वा ये इतिहाससंशोधने एव समर्पितात्मसमयाः ते तत्रतत्र प्राच्यग्रंथालयेषु संशोध्य रत्नानीमानि उपलभ्य प्रकाशयन्तु इति तान् सांजलिबंधमभ्यर्थयामो वयम् । एवमभ्यर्थने मूलमिदम् यत् देव्याः सम्राज्ञ्याः कविकुलमूर्धन्यायाः तिरुमलाम्बायाः एतत्काव्यरत्नस्योपलब्धिरपि प्राच्याद् ग्रन्थालयादेवाभूदिति ।

पंचनदीयविश्वविद्यालये संस्कृतविभागाध्यक्षा डी. एल्. (आक्सफोर्ड) एम्. ए. (पंजाब) पदवीविभूषिताः श्रीलक्ष्मणस्वरूपमहाभागा १९२४ तमे खिस्ताब्दे दक्षिणदेशमिममभ्यागता राजकीये पुराणहस्तलिखितग्रन्थसंग्रहालये

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तंजावरनगरे जीर्णमेकं **वरदाम्बिकापरिणयं** नाम हस्तलिखितं चम्पूग्रन्थरत्नं प्रथममध्यगच्छन् । लिप्यंतरगतं तन्महता प्रयत्नेन देवनागर्यां प्रतिलिपिमकारयंश्च । ततश्च ते महाभागाः प्राच्यविद्यापरिषद्द्वये ग्रन्थोपलब्धिं तदीयान् विषयांश्च प्रतिबोध्य एतस्यैव ग्रन्थस्य संचिकांतरं संग्रहाय प्रयत्य निष्प्रत्याशा जयपुरीयसंस्कृतमहाविद्यालये प्रधानाध्यापकैर्महामहोपाध्यायैः सुप्रसिद्धैर्गिरिधरशर्मचतुर्वेदमहाभागैस्तथा आगरास्थसंस्कृतमहाविद्यालये प्रधानाध्यापकैः पंचतीर्थैर्हरिदत्तशर्मभिश्च विरचितया टीकया समलंकृत्य च प्राकाशयन् । महाभागानामतिशयं प्रशंसनीयं कर्म इदम् । संस्कृतप्रपंचे महोपकारिभ्यो महाभागेभ्यो लक्ष्मणस्वरूपेभ्यो वयं धन्यवादान् सहस्रशो दायंदायं समभिनन्दामस्तमाम् ।

या इयं प्राक् प्रसक्ता देवी सम्राज्ञी तिरुमलाम्बा सा विजयनगरवीरनरपतेरच्युतरायस्य सार्वभौमप्रवरस्य पट्टमहिषी अच्युतरायमहाराजस्यैव वरदाम्बिकया सह परिणयं सुंदरतया संवर्ण्य ग्रन्थमिममयत् । अर्थाद् ग्रन्थस्यास्य "**वरदाम्बिकापरिणय**" इति नाम कृतम् । चम्पूग्रन्थश्चायम् । गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते इत्युक्तिमनुसृत्य तादृशमेवेदं कृतं काव्यरत्नम् । काव्यस्यास्य संक्षिप्तः कथासारः इत्थम् ।

प्रसिद्धे चन्द्रवंशे ययातिनृपतेस्तनूजस्तुर्वसुः । तुर्वसोरन्वयाये तिम्ममूपः । तस्य चेश्वरः पुत्रः तस्माच्च नरसिंहः । सच नरसिंहो विजयाय प्रस्थितः प्राचीं विजित्य दक्षिणे चोलमभ्युपागच्छत् । तत्र सरित्प्रवरां कावेरीं तीर्त्वा तद्दक्षिणे तटे सैन्यं निवेशयामास । चतुरंगबलसमेतश्चोलनृपालो युद्धाय सन्नद्धोऽभूत् । तत्रोभयोर्युद्धे प्रवृत्ते नृसिंहदेवः कुंतप्रहारेण हस्तिपृष्ठात् च्युतं चोलेन्द्रं स्वयं गजपृष्ठादवतीर्य जीवग्राहं जग्राह । ततश्च विजयमालालंकृतः प्रमोदपरवशया स्वसेनया समुपेतः शत्रुराजधानीं प्रविवेश । ततो रामेश्वराभिमुखं गत्वा समुद्रं ददर्श । तत्र समुद्रतटे रामसागरादीनां वीराणां देवदानवादीनांचाद्भुतानि च कर्माणि शृण्वन् रामेश्वरं नमश्चक्रे ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्रतत्र चानेकान् शत्रून् पराजित्य सागरे स्थिरे सलिले सेतुं बद्ध्वा श्रीरंगपुरीमाययौ । तदधीश्वरो महावीरः पुत्रकलत्रादिपरिवारपरिवृतः समागत्य पादयोर्निपत्य आत्मनो गत्यंतराभावमुद्घोषयन् राज्यं नृसिंहसादकरोत् । कृपाविष्टमनास्तु नृसिंहस्तं तत्र पुरि प्रस्थाप्य तत्र दुर्गद्वयमग्रहीत् । ततश्च गोकर्णनाथं प्रणम्य तत्र तुलापुरुषदानपूर्वं नानाविधदानानि समतनोत् ।

अनेकानेकनरपतिभिरनुगम्यमानः उत्तरां दिशं प्रतस्थे । तत्र कांबोजबाल्हीकादीन् पराजित्य विविधैश्वर्यसमृद्धो निजराजधानीं विद्यापुरीं प्रतिनिवृत्त इति । ततश्च दिवसकरकुलोत्तंसां रामांबासुतामोंबमांबां परिणीय तस्यामच्युतप्रसादादच्युतं पुत्रमेकमलभत । यौवनमारूढे चाच्युतराये नृसिंहदेवः सुरसख्यमभजत् । स्वर्गते पितरि अच्युतरायः सिंहासनमारुरोह ।

एकदा उद्यानगतो भवान्यायतने कामपि रमणीयां बालां ददर्श । सुचिरं तां निर्वर्ण्य विस्मयस्तिमितो राजा नियंत्रित इव निरभिज्ञ इव निश्चलध्यानशील इव निरवधिकानंदमनुसंदधान इव निरुद्धमनोवृत्तिः निर्निमेषवीक्षणः समतिष्ठत् क्षणम् ।

सापि रविकुलललामभूता नाम्ना वरदाम्बिका गौरीपूजायै तत्र समागता सांगमिवानंगं तमवलोक्य असमाप्तक्रिया एव पवनांदोलिता लता इव कंपमानगात्रलतिका तं पुनःपुनर्लोचनाभ्यामापिबंतीव पश्यंती स्वात्मनोऽप्यप्रभवंती मणिस्तंभमवलंबितवती ।

एवं परस्परावलोकनसमनंतरं व्यत्यस्तचित्ताविव विस्मृतनिमेषौ विवर्जितनिखिलव्यापारौ परिहृतचैतन्याविवाभूताम् । ततश्च प्रधानमंत्री तत्रागत्य राज्यकार्याय विदूषकमुखेन राजानं विज्ञापयामास । विज्ञापनामाकर्ण्य अनिच्छन्नपि भूपतिश्चलितुं कथमपि समनीनहत् । राजकन्यापि निजागारमगात् । आगत्य भवनं अनभिभाषमाणा सखीजनं अनवेक्षमाणा परिचारिकावर्गं अशुश्रूषमाणा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुरून् अवन्दमाना कुलदैवतम् अगणयन्ती वीणां अनालापयंती सारंगान् अनुलापयंती हरिणीं अनर्तयंती बर्हिणं अनुद्वाहयंती कृत्रिमपुत्रिकां असंयोजयंती हंसमिथुनम् अनध्यापयंती राजकीरं तमेव निध्यायंती आवेदितहृदयतापातिशया चेतसि चिंतां महतीं समतानीत् ।

अथ सखीभिः सानुरोधमनुबध्यमाना शालीनतया गौरीवने तस्य विश्वंभरापतेर्दर्शनात् प्रभृति कर्म किंचित् किमपि उदंचतिस्म । चांचल्यमिदं वारयितुमहं न पारयामि समुचितमितः परं भवतीभिरेव निवारणीयमिति निश्चयमुदीरयंती सैरंध्रीभिः समं सत्वरमभिवर्तमानं सौविदल्लं कमप्यद्राक्षीत् । आपृष्टश्च स प्रहृष्टमना विस्पष्टमाचष्ट । "यदत्र भवती प्रार्थयमानायाच्युत-महाराजाय दत्तां भवतीं प्रसाधयितुमेताः सपुरंध्र्यः सैरंध्र्यः प्रेषिताः । तदत्र-भवती सत्वरमुद्युंक्तां प्रसाधनाय" इति ।

तदनु मेदिनीपतिः मंगलाचरणसमुचितविविधालंकारशृंगारितः संबंधिगृहं समासाद्य राजकन्यां विधिनोपयम्य अमुष्यै पट्टाभिषेकमहिषीपदमदात् ।

अथ तयोः कालात् कुमारोऽजायत । स चिन्नवेंकटाद्रिरिति चिन्हितोऽ-भूत् । ततः अच्युतमहीमहेंद्रो बाल्ये एव समुल्लसदसाधारणानुभावमत्युदारं कुमारमालोक्य शुभंयुदिने दिदेश शाश्वतं युवराजपदमिति ।

अर्थात् तिरुमलाम्बा ग्रन्थेऽस्मिन् चन्द्रमारभ्य श्रीनृसिंहपर्यन्तं राजवंश-मुपवर्णयंती तत्तनयमच्युतरायमुपवर्ण्य तस्याकस्मिकं वरदाम्बिकासन्दर्शनं ततश्च विवाहमंगलं तनयोत्पत्तिं तनयस्य यौवराज्ये अभिषेकं च संवर्ण्य ग्रंथं समापयति । परमच्युतरायस्य यो भ्राता श्रीकृष्णदेवराय इति जगत्प्रसिद्ध-श्चक्रवर्ती यश्च तत्कालीनपारदेशिकप्रवासिभिरैश्वर्यसमृद्ध्या भूमण्डले अपरोऽय-माखण्डल इति समुपवर्णितस्तस्य नामापि न जग्राहेत्येतदाश्चर्यमुत्पादयति । कर्णाटके किल कृष्णदेवरायाच्युतराययोरुभयोरपि नामनी सुप्रसिद्धे । श्रीकृष्ण-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देवरायस्वर्गमनानंतरमेव अच्युतरायः सिंहासनमध्यारोहदिति इतिहासे सुप्रसिद्धम् । श्रीकृष्णदेवरायस्य नामानुल्लेखने किं वा कारणं स्यादित्येतत् तदितिहासविद्भिरेव संशोध्यमिति तेष्वेव भारमारोप्य वयं प्रकृतमनुसरामश्च ।

अत्रान्योप्यस्माकमूहः । इयं वरदाम्बिका एव तिरुमलांबा स्वस्या एव प्रणयपरिणयं 'वरदाम्बिकापरिणय' नाम्ना व्याजहारेति । श्रीमानच्युतरायो वरदाम्बिकां परिणीय तां पट्टमहिषीपदे न्ययोजयदिति वर्णयन्ती आत्मानमच्युतरायस्य पट्टमहिषीं सम्राज्ञीं तत्प्रेमसर्वस्वविश्वासभुवं च वर्णयति । यद्यपि ग्रन्थे वरदाम्बिकां वर्णयति तत्र च स्वयमेव वरदाम्बेति न स्पष्टं यत्रकुत्राप्यावेदितवती । परं तथापि आत्मनो विशेषणानि यानि पदानि व्याहरति तैः पदैरेव इयमेव पट्टमहिषी सम्राज्ञी स्वस्या एव परिणयकथां प्रेमप्रवाहरूपां वरदाम्बिकापरिणयनाम्ना प्राकाशयत् इति । अयमस्माकमूहः प्रमाणविरुद्धश्चेत् यः कोऽपि वा विद्वान् तत्तत्प्रमाणोदाहरणपुरस्सरं यथार्थयुक्तिनिरूपणपूर्वकं च विरुद्ध इति समर्थयेत्तर्हि सानन्दं तन्मतं वयमूरीकुर्म इति प्रतिपादयामश्च ।

कवयित्र्या अस्याः कालस्तु निर्धारयितुं सर्वथा अनुकूल एव । एकोनत्रिंशदधिकपंचदशशततमे । (१६२९) ख्रिस्ताब्दे श्रीमदच्युतरायराज्याभिषेकः समभूदिति वदंति । ख्रिस्तीयद्विचत्वारिंशदुत्तरपंचदशशतावधि अच्युतरायस्य राज्यमभूदिति च । अर्थात् श्रीमदच्युतरायस्य तनयस्यापि यौवराज्याभिषेकवर्णनं काव्यरत्ने ग्रथितमित्यतः चत्वारिंशदुत्तरपंचदशशततमद्विचत्वारिंशदुत्तरपंचदशशततमवर्षयोर्मध्ये एव चम्पूनिर्माणमभूदिति स्पष्टम् ।

यथा प्राचीना इतरे कवयः स्वोदंतावेदने मूकीभावमवालंबंते तथा नेयं महाभागा इत्यतो महानानंदो नः । ग्रन्थांते चेयं इत्येकवाराकर्णनमात्र—दृढावधारित—नव्य-काव्य—नाटकालंकार—पुराणागम—रहस्य—सारस्यानुबंध—समिधान—स्वाभाविक—प्रतिभानुभावया,—विद्याविशेष—निरवद्य—विद्वद्वर—सकलकविकुल—श्रवणानन्द—चिंतितानन्ताभीष्ट—फलाश्रयण-विश्राणन—कामगवीभवदशेष-भाषा—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विषय—सविशेषोन्मेष—चतुरिमगर्भित—सरस—प्रबंध—संदर्भया, विविधविद्याप्रगल्भ—राजाधिराजअच्युतरायसार्वभौमप्रेमसर्वस्वभुवा,—निरुपाधिकमहोपकारानिर्माण—धर्म—निर्मल—हृदयया, निखिल-लिपि-विलेखन—नियत-वितरण—कृतहस्तहस्तारविंदया, विरिञ्चचञ्चलनयनानखाञ्चलसमुदंचित—विपंचीप्रपंचित—पंचम-मधुरिमोदंचन—विकस्वर-कण्ठस्वरया, विपुल—तलातल-विहार—बिनोद—साकारावतीर्ण—शतपर्णासन—वरवर्णिनीमतिनिर्णायिकया—नानादेशप्रतिष्ठितानेकविरचित—वाजपेय-पौण्डरीक—सर्वतोमुखमहाध्वर—द्विजवर—वितीर्यमाणाशीर्विशेषपरिपोषितभाग्यसौभाग्यया, नियतरक्षितकविकुटुम्बया, तिरुमलाम्बया, निर्मितं वरदाम्बिकापरिणयं नाम चम्पूकाव्यं आचन्द्रतारकमभिवर्धतामिति निरदिशत् । अयं च ग्रन्थान्तसन्दर्भः तिरुमलाम्बाया वैदुष्यं काव्य-नाटकालंकारपुराणागमादिरहस्याभिज्ञत्वं अनेकभाषानैपुण्यं नानालिपिविज्ञत्त्वम् कविकुटुम्बपालकत्वं धार्मिकत्वं द्विजवररक्षाप्रेम बहुयज्ञानुष्ठापनशीलत्वं द्रव्यदानस्नेहं विद्वज्जनसमितिसंस्थाप्रियत्त्वं कलाचातुर्यम् पण्डितगोष्ठीसौभाग्यं च प्रकटयति । सौन्दर्यावतारतया च अस्या अभिनवरूपबहुत्वं अच्युतरायप्रेमसर्वस्वभूततया विस्रंभपात्रत्वं च सिद्ध्यति ।

अस्माच्चम्पूग्रन्थात् उत्सर्पिणी उत्प्रेक्षाशक्तिः स्फारीभवंती धिषणा वर्णनकलायां प्रौढी वर्णचित्रेषु चातुरी च स्फुटमवसीयते । प्रचलत्स्वपि समासतरंगेषु विशेषणस्रोतस्सु द्राक्षारसामोद इव कश्चन नारीजनसुलभो मोदोऽस्याः कृतिमभिव्याप्नोति ।

अस्याः सुललितपदविन्यासकलाकौशलमुपदर्शयितुं कानिचिदेव सुन्दराणि पदान्यत्र वाचकप्रीतये समुपाहरामः ।

"तमालिके! समाकलय तमालतरु-कोमल-दलमालिकाभिः वन्दनमालिकाम् । माधविके! माकन्दधूलिधूसरिताः शोधय शिरीषकेसरपिच्छिकया काञ्चनवेदिकाः । कलापिके! निरूपय कमलिकाकलितां कल्हारपरागरंगवल्लीम् । मंजरिके! रंजय मणिदर्पणान् अंजसा कंजवनरेणुपुंजेन । अधि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वासय वासरिके! घनसाररजसा केसरकुसुमरसान् । वल्लकीसंल्लापिनि! कल्हार-मुकुलनायकविन्यसनेन समुल्लासय मल्लिकाकोरकहारवल्लीम् । लीलावति! निशमय ममालापम् । बालाशोकमुकुलमालायाः परिहर भसलजाल-कोलाहलम् कुत्राशयस्तव कुसुमवति! चित्राणि वितनु शतपत्राभिनववंधनानि कोमलानि कुसुमदामानि इत्यादि ।

विलसदलसचारैर्विस्मयस्मेरतारैः
प्रणयरसगभीरैः प्रान्तविस्तारशारैः ।
वरतनुरवदातैर्वंचितासीत् सुशीतैः
प्रसवविशिखदूतैः पार्थिवस्याक्षिपातैः ॥ १०६ ॥ इति.

समयेऽस्मिन्काव्ये गद्यानि पद्यानि सर्वाण्यपि रससंभृतान्येव । अतो ये रसिकास्तान्वयमावेदयामो यदवश्यं ग्रन्थरत्नमिदं संगृह्य अमन्दानन्दतुंदिला भवंतु भवंतः सर्वे । मूल्यं रूप्यद्वयम् । अन्तर्बहिस्सुंदरमिदं पुस्तकं सविस्तरया आंग्ल-संस्कृतभाषामय्या प्रस्तावनया समलंकृतम् व्याख्यया च । "चौखम्बा-संस्कृतपुस्तकालय बनारस" इत्यत्र तथा च सुन्दरलाल जैन पंजाबसंस्कृत-पुस्तकालय सैदमिठाबजार, लाहौर इत्यत्रापि लभ्यते ।

कर्णाटकसार्वभौमप्रियवल्लभाया देव्याः तिरुमलांबायाः विषयमिमं तथा च तस्या ग्रन्थरत्नं च सामान्यतो निरूपितमिदानीमस्माभिः । एवमेव सत्यवकाशे अन्यासामपि कवयित्रीणां विषयमुद्दिश्य विवेचयामो वयम् इत्याश्वासयामश्च ।

संप्रति लेखेऽस्मिन् भूयान् विषयः वरदांबिकापरिणयग्रंथात् तथा तत्र प्रकाशितायाः प्रस्तावनायाश्च गृहीत इत्यतस्तेषामुपकारभारं कृतज्ञताभावेन वहाम इत्यावेद्य विरमामो विस्तरात् इत्यलम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नियमावलिः

(१) मधुरवाणीनाम्नीयं संस्कृतपत्रिका प्रत्याङ्गलमासप्रथमसप्ताहे प्रकाश्यते

(२) अस्यां प्रायः प्रत्यङ्कमेका लघुकथा, सनातनधर्मविषयकः प्रबन्धः प्राचीनसाहित्यं चान्ये प्रचलितविषयका विवेचनात्मकालेखाः प्रकटीक्रियेरन् सनातनधर्मद्रोहिणो लेखा नावकाशं विन्देरन्। ग्राहकेतरेषां लेखाः पद्यानि वा न प्रकाश्येरन्।

(३) पत्रिकाया अस्याः अग्रिमदेयं मूल्यं मार्गव्ययसहितं रूपकचतुष्टयम्। अंकस्यैकस्याणकषट्कम् मूल्यम्। द्वीपान्तरवासिनां तु वार्षिकं मूल्यं पञ्चरूप्यात्मकम्। विना मूल्यमादर्शसंचिका न प्रदीयेत। तदिच्छुभिश्च चतुराणकमूल्यानि शुल्कपत्राणि ग्रहीयन्ताम्।

(४) मधुरवाण्याः श्रयोभिवृद्धये पञ्चरूपकाणां दातारः सहायकाः' दशरूपकदायिनः पोषकाः, पञ्चविंशतिरूपकप्रदा अनुग्राहकास्ततोऽप्यधिकं यच्छन्ता संरक्षका इति व्यपदिश्येरन्।

(५) मधुरवाण्यां नीरसा अमृवाच्याक्षरा एकपार्श्वे एवालिखिता लेखाः नावसरमासादयेयुः। लेखपरिवर्तनादिषु निरनुयोज्याधिकाराः खलु सम्पादकाः। अप्रकाशिता लेखा विना प्रापणव्ययं न प्रतिग्रहीयेरन्।

६) लेखा, विज्ञापनानि, समालोचनापेक्षिणो ग्रन्थाः, पत्रिकाश्चेत्यादि सकलं मधुरवाणी कार्यालय बेळगांव नं १६९८ इति संकेतेन प्रेष्यम्।

त्रं मूल्यधनं वा प्रेषयद्भिः निजसंकेतादिकं देवनागरीलिप्यैव सुस्पष्टं विलेखनीयम्। भूतपूर्वग्राहकैः पत्रस्य धनस्य वा प्रेषणसमये ग्राहकसंख्यालेखनं नैव विस्मरणीयम्। उत्तरप्रेप्सुभिरवश्यं प्रेषणीयः प्रापणव्ययः।

प्राप्तिस्थानम्
मधुरवाणी कार्यालय, १६९८ बेळगांव.

Printed at Veer-bharat Printing Press, Belgaum' by its proprietor A. P. Chougule and Published by Shriniwasacharya Buli at House No. 1698 Belgaum.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Regd No. B. 3664.

PINK OINTMENT

खरूज २४ तासांत बरी होतें

पिंक मलम

तोंडावरील तारुण्यपिटिका (मुरुम)
डोक्यांतील फोड, इसब व त्वचारोगांसाठीं
सुगंधीत मलम

याने कपडे खराब होत नाहीं

सल्फनमाईड, मर्क्युरी, कँम्फरझिंक
आणि म्हैसूर चंदन तेलांत
बनविलेले
पिंक मलम

स्टार कंपनी बेळगांव.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.